सिद्धांत सुधानिधि:

प्रथमाध्याय २ पाद

३०
पत्राणि: ५५

स्तु १

५ प्र
सि. स.

संज्ञाधिकारादन्यत्र संज्ञानां समावेशादर्शनात् अत एव न लुमताङ्गस्येति निषेधः संगच्छते अन्यथा प्रत्यय
लोप इत्यस्य लुगादिविषये प्रसङ्ग एवाभावात् स्यादेतत् प्रत्ययस्येति किमर्थं न तावदप्रत्ययनिवृत्त्यर्थम्
लुगादिविधौ सर्वत्र प्रत्ययस्यैव स्थानित्वात् प्रसिद्धेः अत्रवादेवतज्ज्ञापितस्यैव ग्रहणात् न च लुक् तद्धितलु
कीत्यत्र गोस्त्रियोरित्यनुवृत्त्या गोशब्दस्यापि लुगापत्तिः योगविभागात् गोरुपसर्जनस्य ततः स्त्रियाः लुक् त
द्धितेत्यत्र स्त्रिया इत्यनुवर्तते गोरिति निवृत्तेः अन्यथा प्रत्ययग्रहणे कृतेऽपि गोमत्यै प्रत्ययस्य लुक् स्यात् कं
सीयपरशव्ययोरित्यत्रापि कंसीयपरशव्ययोः प्रातिपदिकावयवस्य लुक् विधीयते अप्रातिपदिकाद
त्यधिकृतत्वात् अतः प्रकृतिभागस्य न लोपः अन्यथा कमेः सः कंसः परान् शृणातीति परशुरित्याकारसकारयो
र्लुगापत्तेः न चात्रिभृगुकुत्सेत्यादौ प्रतियोगिविशेषसमर्पणार्थम् तत्र यस्कादिभ्यो गोत्रे इत्यतो गोत्रपदानु
वृत्तेः यस्कादिगोत्रे यो विहितस्तस्य लुग्विधानात् जनपदे लुबित्यत्र प्रातिपदिकाधिकारात् प्रत्ययानुवृत्तेश्च
अजनपदे विहितस्य चातुरर्थिकप्रत्ययस्य लुक् लवणाल्लुगित्यत्रापि ठक एव प्रकृतत्वात् तस्मादित्युत्त
रस्येति पञ्चम्याः प्रत्ययस्येत्यस्य षष्ठीत्वकल्पनात् न त्वयमजोः सुपो धातुप्रातिपदिकयोरित्यादौ लोपप्रति
योगिप्रत्ययस्यानेकाच्त्वे अलोऽन्त्यस्य लवणाल्लुगित्यादावादेः परस्येति आदिमात्रस्य लोपो माभूदिति सर्वा
देशार्थं प्रत्ययग्रहणम् एवं लोपप्रकृतेऽपि लग्वाइहेति लग्वचनस्य सामान्यापेक्षज्ञापकतया लुमतां सर्वादे
शत्वसिद्धेः न च लोप एव सर्वादेशो लुगादयस्त्वलोऽन्त्यस्येति वैपरीत्यं स्यादिति वाच्यम् असंजातविरोधितया
लोपस्यान्त्यादेशत्वसिद्धेः लुगादीनामेव सर्वादेशत्वकल्पनात् आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् इत्यत्र
लुगणिञोरित्यतो लुग्ग्रहणमनुवर्तते न वा नायं स्थानिनोद्दिष्टौ आदेशास्तु लकारसहचरय इति यथासंख्यं
विरहेऽप्येकैकस्यादेशद्वयप्रसंगात् ततश्च अगस्तयोऽपि कुण्डिनाः स्युः कुण्डिनाश्चागस्तयः लकवयघटितापि
कात्सर्वादेशास्तदा उभयत्रापि विभक्तिमात्रं श्रूयेत नान्यः प्रकृतेरसिद्धेरपि अगस्तीनाक्काञा आगस्तीयाः इति आ

स्तु १

॥ अदर्शनं लोपः॥ प्रसक्तस्याऽदर्शनं लोपसंज्ञं स्यात् स्थानइत्यनुवृत्तेः नचाऽदर्शनशब्दस्यैवेयं संज्ञा
स्यादिति लोपो व्योरित्यादौ सप्तम्यपवादेशः प्रसज्येतेति वाच्यं महासंज्ञासामर्थ्याददर्शनस्यैव संज्ञित्वात् नच
प्रदेशेष्वेव लौकिको लोपशब्दार्थो विज्ञास्यते यस्य च वपत्यमित्यादाविव तिसंज्ञा सूत्रमनारभ्यमिति वा
च्यं प्रसक्तस्येति प्रतियोगिविशेषलाभार्थं तदारंभात् अन्यथाऽदर्शनमात्रस्यादौ किमः [illegible] भाविका लो
दर्शनसत्वेन लोपसंज्ञायां प्रत्ययलक्षणेन तद्धृक्स्यात् तथाच वार्तिकं सिद्धं तु प्रसक्तादर्शनस्य लो
पसंज्ञित्वादिति नत्ववार्तिकमते नन्तरस्य विध्यर्थत्वादस्त्वेवं भाष्यमते तु तन्नियमार्थे स्थानिवत्सूत्रे
णैवकार्यप्रवृत्तिरिति वक्ष्यते नचात्रान्तकस्त्वेन प्रसक्तिः यष्टीग्रहणास्य तत्राऽनुवर्तितत्वात् अतएव ग्राम
णीरित्यादौ अर्थोपपद यात्तसन्निधानादर्थतः शास्त्रतश्च प्रसंगो क्विपो विधानेपि वृद्ध्यादिकं न भव
ति तस्मादिदं सूत्रं निरर्थकमिति चेत् मैवं चात्र लोपपदेवत्यवधारणे वृद्ध्यादिलोपविभाषेति सूत्रयोरा री
नामप्रयोगस्यैव लोपपदार्थत्वात् षष्ठीनिर्देशेन लोपविध्यभावात् लोपसंज्ञानुपपत्तेः अयमेवारण्यं
ग्रा^ गच्छत्वयमेव ग्रामं गच्छत्वित्यादौतिं ऽतनि[illegible] ननिषेधस्य शुक्लाश्रीहयो भवन्तिष्वेतागाश्रान्याय इत्यन्नी
स्य^ त्यादौ निपातनिषेधविकल्पस्वाऽनुपपत्तेः सूत्रारंभेतत्रशास्त्रतो लोकतोवा न तदप्रसक्तेर्न दोषः नचवा
र्तिकमते ग्रामणीरित्यत्र वृद्धिः स्यादिति वाच्यं क्विपा अणः प्रसंगापहारात् विशेषशास्त्रनिर्मुक्तयवर
सामान्यशास्त्रस्य प्रवृत्तेः सत्तद्विषेति क्विपो विषयेक्रमेणान्यस्य प्र[illegible]रेवाभावात् ॥ प्रत्ययस्यलुक् सत्ते^
लु [illegible]लुपः॥ नेत्रात्यादिनान्तज्ञाविताना मिमाः संज्ञाः अनेकसंज्ञाविधानसामर्थ्यात् लुकश्लुलुपतेः शाद्वैः
कृतं प्रत्ययादर्शनं क्रमेणान्तन्नसंज्ञं स्यात् नचैवं विधिप्रदेशेष्विवतराश्रयापत्तिः अदर्शनस्यनित्य
त्वेपि लुगादिसंज्ञया भावितत्वस्य तदभावेन पूर्ववत्यविहारासंभवादिति वाच्यं भाविसंज्ञाविज्ञानात्
प्रदेशाश्च लुक्ङितलुकि जुहोत्यादिभ्यः [illegible] जनपदे लुवित्यादयः लोपसंज्ञायाश्चैनेनाभिवीयः पक
लु

५
प्र॰
सि॰ सु॰

वात् इत्ला[illegible]दिति विशेषणात्तैयेव वर्णस्य तत्राश्रयणात् एतदर्थमेवैव वर्णाग्रहणेनास्तीत्यत्रोपनि॰
बद्धत्वात् अत एव धिल्विक्रुणर्व्योर्वि विलोपो योरिति वलोपेन तस्य निमित्तत्वात् वस्तुतो निमित्तत्वस्य प्र॰
त्ययद्धत्ति त्वेपि न यातलोपः इति गुणनिषेधो न प्रवर्तेत आर्द्धधातुकस्य तत्र निमित्ततायाम नवच्छेद
कत्वात् वलत्वस्य च प्रत्ययत्वव्याप्यत्वविरहात् तेन सुधेसुधेतो सुधेनः सुकः सुकणी सुकणीस्या
दिसिद्धं एतेन सुधेसुधे वा इति विधान्तराणां सकारणेलाववनस्रामः विशेषणो हेय इत्यादिकं तु
वेदेटधीतो सहि वैयटीये इति व्याख्यानम् धातोर्लोपायस्मिन्निति वड्व्रीहिणोवासिद्ध आर्द्धधातुक
ग्रहणसामर्थ्यान्नत्वे नु निमित्तत्वलाभात् नेचनोतेतीत्यादिव्याप्त्यावारितार्थ्य यङ्लकस्थानेस
त्वात् भाषाविषयत्वेपि आर्द्धधातुकग्रहणस्याप्त्या द्वितीयसामर्थ्यमिति बोध्यं पूर्वस्मिन्योगेप्यार्द्ध
धातुकग्रहणं तटनवकाशमिति क्विति चेत्येतन्नत्वैयभाष्येकैयानास्याम्लकत्वादिति वदन्ति ११
देत्रविंश आर्द्धधातुकग्रहणाल्लोपगुणयोरेकस्मिन्किनिमित्तकत्वमात्रेष्यते नत्वार्द्धधातुकत्वाव
च्छिन्नत्निरूपितकार्यत्वपर्यन्तं लोलुव इत्यादावपि गुणनिषेधानुपपत्तेः यङोचिचेति लोपस्य
चुन्यपस्य वस्तुत आर्द्धधातुकेत्व[illegible] निमित्तत्वनिरूपितकार्यत्वविवक्षणीयं व्याप्यत्वववमेदाभेदसा
धारणं आर्द्धधातुकानुत्ति[illegible] विकृतत्वत्वस्यैव धर्मेभिमतत्वात् अत एव वलत्वस्य आर्द्धधातु
कातिरिक्तवृत्तित्वान्न निषेधप्रवृत्तिरिति तस्य उक्तभाष्यस्वरस्यादत्रवितेवन भवति क्विपि[illegible]
कृते धिनुः धिलौ धिलः कृणुः कृणवौ कृ[illegible] इत्यादि सुधीसुधिनौ सुधिनः सुकौः सुकणौ कृण
इत्यादिः यङ्लको भाषाविषयत्वे आर्द्धधातुकग्रहणस्य[illegible]त्यादौ वा रितार्थ्यदाहन्तोवमाला
भावानुगुणनिषेधे सुधी सुधिनौ सुधिनः सुकौः सुकौणौ सुकोणस्यपि भवतीति दीक्षिताः नतु गोर
वौरित्यत्र क्विपोलोपे त्वदीर्घयोरनेनैवविधानादेकलक्षणतादिष्व्रातिषेधानुपपत्त्या परत्वादीर्घत्वेनस्यात्

निमित्तत्व^ चित्रार्द्धधातुकत्व स्यनिमित्ततानव च्छेदकत्वात् तस्मा दार्द्धधातुकत्वव्या प्यधर्मावच्छिन्न ^

स^

नुजेष्ठि
सु^
तोनातौ^

स्पा

गदीव्यतीये प्रज्ञादौ प्रत्यये विवक्षितेऽप्यग[…]देशस्य निषेधाभावात् तत्रावसूडन्या तच्च प्रत्ययानुपपत्तेः
इह प्रत्ययग्रहणेन श्रागस्त्यकौण्डिन्ययोः प्रत्ययाश्रयस्य लुक परिशिष्टभागयोर्यथासंख्यमग[…]कुण्डिनचावा लि^
देशौ इत्यगस्त्यः कुण्डिना इति च सिद्धं प्राग्दीव्यतीयविवक्षायां तु गोत्रे लुगचीति लुक्प्रतिषेधेन तत्सन्नियोग
शिष्टागस्तिभावस्यापि निवृत्त्यभावादागस्त्यस्य इड्ङल्वान् छे सूर्यतिष्यागस्त्येति लोपे चागस्तीया इति सिद्धम्
कौण्डिन्ये तूभयथापि न विशेष इति नैवं वक्तव्यं न तस्माद्लुगित्यस्य तत्रावधयमनुवर्त्यं तथा पूर्वदोषपरि
हाराय प्रत्ययग्रहणमत्रावश्यं के भाष्यकृता तत्प्रत्ययलोप इत्यत्र विशेषणार्थं द्वितीयं प्रत्ययग्रह
णमुक्तं तदर्थं तेन समस्तप्रत्ययस्य लोप एव प्रत्ययलक्षणं नत्वेकदेशलोपे प्रत्ययस्याप्राचीनसंज्ञायस्या
श्रेणामीयेत्यत्र परत्वादुपधालोपे पुनः प्रसंगविज्ञानादनुनासिकलोपः स्यादित्याह इहेदं तत्तत्सं
वादे प्रार्थ्यमपीदं सामान्येन ज्ञापनस्यागतिरिति न वाच्यमित्याहेति दिक् ॥ प्रत्ययलोपे प्रत्ययलक्षणं ॥ स्^
प्रत्यये लुप्तेऽपि तन्निमित्तकं कार्यं स्यात् तेन श्रधोट इत्यत्र तिपो लुप्तत्वेऽपि त्वाद इमिति इलादि
पित्सार्वधातुकं निमित्तीकृत्य ईमागमः नचात्र स्थानिवदित्यनेन गतार्थत्वम् अल्विधित्वात् विशे
य^ षणत्वेनाप्यलाश्रये तुल्यविधावतिनिषेधस्य स्वीकारात् वर्णाश्रये प्रत्ययलक्षणं नास्तीत्यस्य
तत्रायं विषयः वर्णप्राधान्यमात्र न तत्सूत्रेः तथा हि प्रकृतसूत्रे प्रत्ययलोपे […] न लक्षणमित्येवास्तु
यद्वा द्वितीयभागएव मास्तु स्थानिवदित्यनेन तस्यासिद्धेः तदुपादानसामर्थ्याद्धि प्रत्ययमात्रवृत्ति
स्ल^ धर्मो यत्र निमित्ततावच्छेदकं […]देवकार्यं प्रत्ययलोपे भवति न तु गवे हितं गोहितमित्यादावयवादे
तस्य^ शः अवत्वस्य तत्र निमित्ततावच्छेदकं प्रत्ययाप्रत्ययसाधारणत्वेन यदत्र न लुमतेति निषेधः तथा
पि स्वयशा इत्यत्र विसर्जनीयस्य इति सकारादेशविकल्पस्य सज्जुटित्यत्र रविरि वेति वर्त्वस्याडर्ताया
त्वात् ईमागमविधौ तु सार्वधातुकस्य विशेष्यत्वात्तस्य प्रत्ययत्वव्याप्यत्वात् तन्नैवमत्रो बाधकाभा

५
प्र.
मि·स·

अत्राहुः परिसंख्यायामत्र नियमपदेन व्यवह्रियते पंचपंचनखा भक्ष्या इत्यस्य नियमत्वेन भाष्ये लिखित
त्वात् स्यान् यद्यपि दोषत्रयवती यथा श्रुतार्थत्यागात् पंचातिरिक्ता न भक्ष्या इति परार्थकल्पनात् प्राप्त
पंचनखेतरभक्षणबाधाच्च तथाप्यत्र सामान्यशास्त्रस्यापि प्रत्ययलोपस्य लक्षणमर्थकत्वे शास्त्रप्राप्तस्या
त्यन्तबाधासंभवात् प्रत्ययलक्षणस्य धर्मावच्छिन्ननिमित्तता कस्यापि कार्यस्य वचनद्वयप्रामाण्याद्विकल्प
एव स्यात् पंचातिरिक्तभक्षणं तत्प्रापकप्रमाणस्य रागस्य दौर्बल्याद्बाध्यत इति वैषम्यं अतः सामान्यशा
स्त्रस्यैवात्र कार्यातिरिक्ताविषयकत्वमवश्यं कल्प्यं अतः प्राप्तबाधरूपो दोषो नास्ति तेन प्रत्ययलक्षणस्य
तद्भिन्ने भवतीत्यस्य न भवतीत्यत्र तात्पर्यात् प्रत्ययलक्षणातिरिक्तं न भवतीत्यर्थः न चास्यानित्यदित्यस्या
नेनोपसंहारापत्तिः सप्तम्यास्तवैयर्थ्यापत्तेः तं वनर्डाकुर्वात्प्रयोगे षष्ठी वा हिविदं करोति आग्रेयं वनर्डाकरोति।
त्यन्तयोरुत्तपरस्यैवोपसंहाराद्वैषम्यं आग्रेयपदे दीर्घविंतनरात्प्रयोगशापदं वा यद्वेदवत्प्रयोगशास्त्राद्वा लप्स्येत
इति स्थितिगुणत्वेनदोषानवस्थरूपमेतान्न सामान्यशास्त्रस्यैव वैयर्थ्यं अत एव नागुल्यादं तथा वनं कुर्यात्तत्रैव
स्यात्तदेवैकवक्तृकवाक्यत्वेनोपसंहारः किं तु दोषाधिक्यकल्पनमेवेति दिक् अथ तथापि प्रवेत्यत्र प्रत्ययल
क्षणेन पदत्वं समासत्वात्यानिपदिकत्वं स्वक्रमोऽस्तीति इत्यु उभयप्राप्तौ कर्मणीति षष्ठीत्यादिग्रंथानाकाग
तिः इत्यत्र व्याहृत्तावेव तात्पर्यात् सामान्यशास्त्रस्यैव तन्निधायकत्वादिति चेत् अत्राहुः उभयप्राप्ताविति पा
रिभाषितानां षष्ठीत्यादिव्याख्येयत्वेन विहितेति अत एवोभयप्राप्तौ कर्मणीति प्रतिषेधकाद्दिप्रयोगेः प्रतिषे
धवार्तिककृता तत्सूत्रस्य प्रतिषेधत्वमेवोक्तं न तु विधित्वं यद्वा सामान्यशास्त्रस्याविशेषेण तात्पर्याभाव
स्योभयकल्पनात् प्रत्ययलक्षणोत्पादिकस्तुतमेवास्तु अस्य च प्रयोजनापेक्षायां प्रत्ययलक्षणातिरिक्त
यथा + कार्यव्यावृत्तिः फलतः सिध्यति यथा इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इति मन्त्रस्तु विधिर्लि
ङ्गकल्प्यविध्यपेक्षया दुर्बलत्वान्निकृष्टत्वात् अपूर्वविधिरेव नावश्यं तावन्मात्रस्य च लैङ्गिकविधिनैव सिद्धत्वादेतत्रैव

मैवं व्यपदेशातिदेशोऽस्त्विति तत्र प्रकृत्याश्रयत्वादिव्यपदेशो लोपेऽपि निर्दिश्यते कार्यं तन्निबन्धनं तत्रा॰
न्त्रैव भवति इति वैविश्यतिषेधसिद्धेः तदुक्तं सिद्धं तु स्थानिसंज्ञानुदेशादान्यभाव्यस्येति स्वार्थेऽत्र आदेश
स्य स्थानिसंज्ञया योऽव्यपदेशस्तस्यानेन विधानादित्यर्थः तस्मात्स्थलिव्यवार्थमिदं सूत्रमिति वार्त्तिकमतम् भा
ष्यकृतस्त्वाह अल्लोपो हस्त्यर्थेनेदं तत्र हलीत्यत्र निर्देशः न चाल्लोपहानिरित्यादौ प्रतिव्याप्तिः नाभ्यस्तस्या
चीत्यस्मादचि नेत्यनुवृत्तेः न चाशी रित्यत्र शासइदङ्हलोरित्येतदर्थं आशासः कावुपसंख्यानात्सिद्धेः तद्वि
नवाप्यावश्यकं तत्र शासिमात्रग्रहणेन आशास्तेरित्यादौ मा भूदिति नियमार्थं अङ्प्रकृतिभूतस्यैव शासः स्याद्व
पोर्दित्वविधौ ग्रहणेन आशास्तेरित्यादौ [illegible] विवक्षितेऽपि तस्याः प्रसङ्गाविथ्यर्थमिति
पंरविशेषः तस्मात्प्रत्ययलोपे प्रत्ययलक्षणमेव कार्यं तत्र प्रत्ययाः प्रत्ययसाधारणधर्मावच्छिन्ननिमित्त॰
त्वनिरूप्य कार्यत्ववदपि कार्यमिति नियमार्थमिदं तेन शोभना दृषदोऽस्य स्तद्दृषत्कासामाद इत्यत्र तच्छाहान्त्य
श्यमन्वेनस्याः तस्य चोत्तरपदस्य बहुव्रीहावाद्युदात्तत्वं भवतीत्यर्थके तसोऽपि न सीप्रालोमोषसीरिति सू
त्रेण प्रदानत्वेन प्रवर्त्तते किं तु न स्युभ्यामित्यतो दात्तत्वमेव प्रत्यथास्तु पोयात प्रातिपदिकयोरिति न सोर्लु
किस्थानिवद्भावेनोत्तरपदस्यान्तोदात्तत्वानपायात् उक्तरीत्या तत्र स्वरूप इत्यस्य प्रत्यय व्यतिविक्तहृन्नित्वान्नेद
षः प्रति नस्य ग्रहणे पदार्थवृत्तहणपातिभाषाया अप्रवृत्तेः एवं प्रत्यक्षस्य नस्येति दीर्घोऽपि न भवतीत्यवधेयम्
वार्तिकमते तूक्तदोषव्यानुस्मृत्यर्थं यत्नाऽनवाचभेगोऽवश्यमिति स्यादेतत् नियमविधेरित्यत्राष्टाङ्गे रेवफलम्
व्रीहीन्न वहन्तीत्यादौ तद्व्यतिरेकेणापि त्वघतंडुलविभागरूपवैतद्व्यसाधनत्वेन दलनादिविकल्पितावा
घातस्य प्राप्त्यात्तत्साधारणप्राप्तावेव तात्पर्येन विधिवैयर्थ्यम् अतः पाक्षिका, प्राप्तिव्यवच्छेदेनात्पर्यं तेन
पाक्षिकप्राप्तिप्रतियोगिनः साधनान्तरस्य निवृत्तिः नचैवमेव नियमफले अप्राप्तांशप्रापणारूपनियमा॰
भावेन तद्रूपपत्तेः तस्मात्वेचार्थोद्देवनात्सिद्धेः प्रकृतविधिभावेत् स्थानिवद्भावस्य न प्रवृत्तिकी प्राप्तिरिति चेत्

यत्रेशोर्लुङ् ऊर्ध्वग्रीवाः इत्यत्र निष्ठाविति निघातेऽस्य पदादिभ्यश्च नित्युप तत्र ञ्नितीत्याद्युदात्तत्वं स्यात् तन्नाशेचैवं + २

ञ्नि^

५ माश्रित्य तन्निमित्तकं कार्यं तस्य न भवतीत्यर्थः फलितः अथपन्नद्वयेऽपि ...त्यादिर्नित्यं कितः पथिमथोः
प्र सर्वनामस्थाने इति विहिताः स्यालौकिक्तेनेपिडर्वाराः तथाचगर्गा विदाः संज्ञायामुपमानमित्याद्युदात्तस्य
सिद्ध षत्वादिति कैयटः अत्रैवपत्यान्यत्र यः इतश्चानिञ इति फक् तस्यानिभृत्कृत्स्तेति लुक् तत्राकितनत्वद्धित
स्येत्यन्तोदात्तत्वं स्यात् प्रत्ययग्रहणपरिभाषया तद्भिन्नौ तस्य तद्विधानात् नचकित्स्वरेण तत्रान्तोदात्तत्वंड
र्वारं राज्ञादिभ्यो विञ् अवेदत्रिनिश्चत्वणादिसूत्रेण इति अत्रिः अत्री इति च रूपद्वयसिद्धेः तत्रप्रत्ययस्यपित्त्वा
दनुदात्तत्वे शेषनिघातेनञ्कारान्तस्याऽत्रिशब्दस्याद्युदात्तत्वे नान्तस्य तन्नित्स्वरेणान्तोदात्तत्वमित्यभ्युपग
मात् अत्रैवविस्तृणोतेः इत्यत्राऽत्रीणां स्तोममद्विव इति लौकिके वा...दात्तप्रयोगात् ऋषिवायेअत्रिवाकेविदत्रि
णा इत्यन्तोदात्तप्रयोगाच्च पथ्याः त्रियो वस्य समृथि त्रियः सृपोधात्विति लौकि पथिमथोरित्याद्युदात्तत्वंच र
स्यात् पथामंगाधिकारीयत्वाभावात् वस्तुतोऽङ्गकार्यत्वाभावाच्च लुम्भित्त इति पदसंज्ञायाः इत्ववक्तस्वरा
णां प्रत्ययान्तकार्यत्वात् अंगात्वस्य तु प्रत्ययावधिकपूर्वभागमात्रव्याप्तित्वात् ननु कितइति मास्त्वंगकार्यं
इतवत् द्वयं तु सप्तमी निर्देशाद्धस्तु तोऽगस्यकार्यं भवत्येवेति भाष्यमतेकथं तन्नसमृक्तिरितिचेन्न सोवर्यः स
प्तम्यर्थं तस सप्तम्य इति स्वीकारात् ञ्निदंतस्यादेरुदात्तइत्यर्थात् तत्रचज्ञापकं भीत्रोभृहुमदजनधनद
रिद्राजागरां प्रत्ययात्पूर्वंपिति नीति पूर्वग्रहणाम् अन्यथा पितिपरे विधीयमानस्य पूर्वकार्यत्वसिद्धान्तदेय
नी^ र्थ्यात् अतएवापोनमं वितिडदात्तत्वं आहवनीय इत्यादौ विदतस्यापोनमे प्रत्ययस्यैवईकारे अवर्तते ततश्च
ष्म^ कृतिभागस्यापोनमे ह्रकाराकारे पूर्वं च...त्यतवस्यामित्यपि वडःतपवेति सिद्धान्तः नैवं वचनं तु वःशासीन्द
दात्तत्वशंसन्नस्यैवस्यात् तथाचषट्त्रिशाश्चन्तवःकल्पयन्त इतिमध्योदात्तपाठविरोध इति वाच्यं शासग्रह
णसामर्थ्यात् नंदतत्त्ववाधात् अन्यथाऽङ्किदंपदादीनि सूत्रएवचतुर्णांग्रह्णूयात् तत्रासर्वनामस्थानग्रहणाउ
दृन्या तत्रानतिप्रसंगात् नचाम्यामित्यादौ तद्दोषः षट्त्रिचतुर्भ्यो हलादिरिति तत्रोदात्तत्वस्यैव सिद्धांतेपीह

घर्णीपस्यागर्दभाभिधानीव्याहृत्तिः फलं कल्प्यते तदुक्तं अप्राप्तविधिरेवायमतो मंत्रस्य निश्चितः प्रयोज
नविधेः किं स्यादस्येति तन्निरूपणेन गर्दभाभिधानीतः फलमन्यन्निवर्तनात् नचात्र विषयान्तरार्थस्यानिव
त्तत्रसर्वं वस्पवत्तात्प्रत्ययलोपसूत्रस्य तदपेक्षया प्रथमप्रवृत्तिः प्रत्यक्षत्वाविशेषादिति वाच्यं तथापि
स्थानित्वादेशत्वाभ्यां तत्तत्स्थान्यादेशानामनुगमेपि वस्तुतस्तेषां भिन्नत्वात् यावत्प्रत्ययतल्लोपयोः रूपा
स्थित्या सामान्यशास्त्रस्य प्रत्ययलोपपवर्त्तित्वं लभ्यते तावत्प्रत्ययलोपे प्रत्ययलक्षणमित्यनेन विशेष
धर्मप्रकारकबोधजननात्प्रथमप्रवृत्तौ बाधकाभावात् एतावान्परं विशेषः तत्र लैंगिकविधिकल्प
नमेव प्रतिवध्यते प्रकृते तु सामान्यशास्त्रस्य प्रत्ययलोपविषयकत्वमात्रमिति अस्मिंस्तु पक्षे श्वो
ऽभ्युदये याययथाश्रुतायुवयोज्याः एतेन नियमसूत्राणां निषेधरूपत्वेन विधिरूपत्वेन वा प्रवृत्तिरिति पक्षद्वये
व्याख्यातं ॥ न लुमताङ्गस्य ॥ लुमता लुक्श्लुलुपामन्यतमेन शब्देन लुप्ते प्रत्यये यादर्शनेन तन्निमित्तमङ्ग
कार्यं न स्यात् गर्गाः मृष्टः जुहुतः यत्रार्थोल्लेमत्ता लोपात् तन्निमित्तौ वृद्धिगुणौ न लुमता किं
कार्यते हार्यते णेरनिटीति णिलोपेऽल्प्रत्ययपेक्षा अस्मात् नित्यत्वाद्धलङ्यादिलोपे पिपर्जेर्हृद्धिः प्रत्ययस्या
त् अङ्गस्येति किं पंच सप्त अत्र प्रत्ययलक्षणेन सुवन्तत्वात्पदसंज्ञाय यथा स्यात् अत्राङ्गमात्रस्यस्व रितत्वा
दङ्गाधिकारविहितमेव कार्यं निषिध्यत इति वार्तिकम् भाष्यकृतस्त्वाहुः एवं सति उत्क्रामेत्यत्रा ऽतो
ह्रेरिति हेर्लुकि क्रमः परस्मैपदेष्विति दीर्घः जिगमिषेत्यत्र गमेरिट् परस्मैपदेष्विति इट् विहन्सेत्यत्रहु
ञ्श्रुतन्भ्य इति ह्रेः प्रतिषेधश्च न स्यात् एषामंगाधिकारीयत्वात् अतोऽङ्गाधिकारीयं तद्धर्हिर्भूत्तावावा
स्तुतो न स्य यत्कार्यं तत्राय निषेधः नचाङ्गकार्यमात्रनिषेधेपुरुक्तदोषतादवस्थ्यम् लोपप्रतिपत्तिपरं
स्मैपदनिरूपितांगसंज्ञायाः क्रामेति प्रातंत मात्रहृनिवात् दीर्घस्पतथा द्विरूपितांगत्वमालितः
क्रमेर्देवविधानात् एवमनवद्येपि तथा वयत्प्रत्ययनिरूपितयस्याङ्गत्वं प्रत्ययस्पस्या निव

५ प्र. सि.स.

वचनं ज्ञापकमनुबन्धलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्येति अन्यथा वं वेवचं वा वध्रिकेव वध्रिका
सक्तार्थस्य कनो लब्धत्रुष्य इति लश् तत्र प्रत्ययलक्षणेन नित्स्वरेणैव न सिद्धे इत्याद्युदात्तवचनं ज्ञापकार्थ
ज्ञापकमेव न च नलमन्तांगस्येति प्रतिषेधः अङ्गाधिकारबहिर्भावात् निर्द्दिष्टस्यादेरित्यर्थो ह्रस्वनांगका
र्यत्वाभावाच्च पथिमथोरिति स्वरप्रतिषेधवचनं तत्कर्तव्यमेव तस्मादनुबन्धलक्षणत्वाभावादुक्तज्ञाप
केन दुर्वारत्वात् न च ज्ञापकस्य स्वरमात्रविषयकत्वं कल्प्यं आमन्त्रितसिज्लुक्स्वरयोरसिद्धिप्रसंगा
त् न च सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणप्रतिषेधो ज्ञाप्यः सर्वस्तोमः इत्याद्युदात्तानुपपत्तेः यद्वा सप्त
मीनिर्दिष्टे स्वरे प्रत्ययलक्षणं न भवतीति ज्ञाप्यं सर्वस्य सुपीत्यत्र सप्तमी समपनीयस्य इति षष्ठ्यन्तपाठ
म् अत्र वदन्ति ज्ञापकं द्वेधा सामान्यापेक्षं विशेषापेक्षं च यदि भीङ्भीत्यत्र सर्वग्रहणं सप्तम्यर्थं पक्षे तदन्त
ग्रहणाय पक्षे च यत्र फलभेदस्तत्रैव सोऽवधेयः सप्तम्या तदन्तसप्तम्य इति ज्ञाप्यते तत्र हि सर्वग्रहणाभावेन तदन्त
पर्वाद्युदात्तः स्यात् सप्तम्यास्त्वग्रहणेन पितं विहाय भीप्रभृतीनामेवाद्युदात्त इति फलभेदः एवं उपोत्तमं रिति
च व्यन्यतरस्यामित्यादौ वाच्यं ञ्नित्यादिर्नित्यम् पथिमथोः सर्वनामस्थाने इत्यादौ तूभयथापि प्रकृत्या
देरेवाद्युदात्तत्वमिति न कश्चिद्भेदः अतो नात्र तदन्तसप्तमीत्वम् अतोऽवश्यं नांगस्य कार्यं भवत्येवेति नलम
न्तांगस्येति प्रतिषेधप्रवृत्त्या न निस्वराद्यापत्तिरिति अकृतसूत्रस्य भाष्यकैयटस्वरसोऽप्येवं षष्ठी तदन्तत्वा
त्सामान्यापेक्षज्ञापकाभिप्राय इति दिक् अत्र य इत्यत्रापि नोक्तस्वरापत्तिः तद्धितस्यैव कितो नोदात्त
विधानात् अत्रत्नस्य लब्धत्वात् प्रत्ययलक्षणस्यात्यदीयकार्यस्यैव प्रत्ययलोपेऽपि विधानात् प्रत्ययस्य
त्वयत्कार्यं तस्य तल्लोपे नपपत्तेः एकनिरूपितयोर्निमित्तत्वकार्यित्वयोरेकस्मिन्नसंभवात् न च तदपि प्र
त्ययांतस्यैव कार्यमिति वाच्यं न हि प्रत्ययग्रहणे तदन्तस्येति सर्वत्रैव वचनम् किन्तु विशेषणांतदन्तस्यं स्वेत्ये
तदर्थमूलकं विशेषणविशेष्यभावे च कामचारात्तत्र प्रत्ययस्य विशेषणत्वानंगीकारात् लोपस्याऽभा

त्वात् नचैवं स्वरविधौ षष्ठीनिर्देशस्यैवापत्तिः रित इत्यादावर्द्धमात्राधिक्यात् इति प्रागेव वार्त्तिकम् लुगका
रप्रतिषेधः पकस्वरस्यापवादत्वात् न सर्वामन्त्रितसिज्लुक्स्वरवर्जं प्रयोजनमिति किल लुक्स्वराः पथिमथोः
सर्वनामस्थाने लुकीति अयमर्थः प्रत्ययलक्षणेन प्राप्तोप्येकपदस्वरो न भवति सर्वामन्त्रितसिज्लुक्
स्वरवर्जम् इति वचनमात्रमेव पदद्वयाश्रयस्तु भवत्येव यथा दधि तिष्ठतीत्यत्र पदस्य पदादित्यधिकारीय
स्तिङ् तिङ इति निपातः दधीत्यस्य पदसंज्ञार्थं प्रत्ययलक्षणस्यापेक्ष्यत्वात् एवं इह तिष्ठेत्यादि बोध्यं स
र्वादिपर्युदासः किं सर्वस्तोमोऽतिरात्र इत्यत्र सर्वस्य सुपीत्याद्युदात्तत्वं सर्पिरागच्छ सप्तागच्छतेत्यत्रामन्त्रि
तस्यैव निघातः षष्ठमाद्युदात्तत्वं मा हि दातां इत्यत्रादिः सिचोऽन्यतरस्यामित्याद्युदात्तत्वं वा पर्यायः स्यात् नचाद्ये बहु
व्रीहौ प्रकृत्येत्यत एव सिद्धिः स्वाङ्गशिटामदन्तानामिति सर्वशब्दस्याद्युदात्तत्वादिति वाच्यं सर्वस्य सुपीत्य
स्य प्रवृत्तिं विना बहुव्रीहावित्यस्य प्रवर्त्तयितुमशक्यत्वात् तद्धि हि तस्यैवाद्युदात्तस्य बहुव्रीहौ प्रकृत्येति व्य
वस्थाप्यत्वात् सर्पिःशब्दस्यापि व्युत्पन्नपक्षे प्रत्ययस्वरेण अव्युत्पन्नपक्षे फिट्स्वरेणान्तोदात्तत्वात् तद्धि प
यस्येत्याद्युदात्तस्य च न प्रवृत्तिः अनिसन्तस्येति पर्युदासात् हृतोदिपावादन्तोदात्तत्वमिति कैयटः नन्वव्यु
त्पन्नपक्षाभिप्रायं न तु सदाशब्दः सर्पिर्भ्यामिद्वेति कविनेनतत्वाद्युदात्तः अव्युत्पन्नपक्षेपि तः संख्याया
इति तथैवेति चेन्न हृतादिवादन्तोदात्तत्वात् सप्तसुंजति वध्येमकचक्रमिति तन्त्रयोगाच्च तस्मात्त्वरत्रयनि
वृत्तिः प्रयोजनमित्यर्थः गातिस्थेत्यत्र सिज्ग्रहणसामर्थ्यात् लुकि स्वरासिद्धिः अन्यथा सेरेव लुकं विदध्यात्
अभूदपादित्यादिसिद्धये अस्तिसिच इत्यत्र सकारान्तवपुषस्याप्येवं परित्यागासंभवात् नचैवं अगात इति
सूत्रं विध्यर्थमेव स्यात्तत् नियमार्थम् तथाच तदेतदनिष्टं येन लुकीति वक्तव्यं त्वा पर्यागो रवं विपरीत
मिति वाच्यं ङित इत्यत्र ह्रस्यैव लदो निवृत्तेः तस्मात्सिज्लुक्स्वरस्योक्तपर्युदासे भेदप्रतियोगित्वेनान्वियो
न कार्यमिति षष्ठे तज्ज्ञापकेन समाहितं तथाच संज्ञायामुपमानमिति सूत्रे वार्त्तिकं उपमानस्याद्युदात्तत्व

९ प्रं॰ सि॰ स
केनस्यात् समुदायावयवयोर्द्वयोरप्युक्तरीत्यापदसंज्ञानिषेधादितिवाच्यं असर्वनामस्थाने इत्यत्रय
चिभमितिसूत्राद्यचीत्यपकृष्य अजादौ सर्वनामस्थाने पदत्वनिषेधात् सोपदसंज्ञासद्भावात् न
चैवं स्वयमोऽपि सौपूर्वस्य पदसंज्ञापत्तिः इष्टत्वात् तस्मान्नमासस्वरमभागस्याजादौ स्वपि नक्वि
चित्पदसंज्ञेतिसिद्धं नैवं वह्नृताभ्याकर इत्यादावलुक् होतापोतारावित्यादावानङ् तस्याङ्गत्वपदत्वाहि
धानादितिवाच्यं उत्तरपदशब्दस्य समासचरमावयवरूढतया तत्र पदसंज्ञानपेक्षणात् नैवम्
पिदधिसेचो इत्यादौ सात्पदाद्योरितिषत्वनिषेधो नस्यादितिवाच्यं पदात्पदादिः पदादौ इतिव्याख्या
नात् पदान्तत्वे सति ग्राह्यत्वात् स्यादिति निघावत् नचरामेषु इत्यादावपि निषेधापत्तिः स्यादिषितिग्रा
पदसंज्ञानामादावेव नत्वनिषेधस्याप्रवृत्तेः तत्र च सात्तिग्रहणस्यैव ज्ञापकत्वात् युक्तं चैतद् पदस्यादौ इ
तिव्याख्याने दधिसेचावित्यादौ षत्वस्य दुर्वारत्वात् गतिकारकोपपदानां कृद्भिः सह समासवचने न
प्राक्सुबुत्पत्तेरिति वक्ष्यमाणत्वात् नच बहुसेचावित्यादौ षत्वापत्तिः बहुचः प्रत्ययत्वेनाऽपदत्वादि
तिवाच्यम् बहुचः परस्येति वचनस्यारभ्यत्वात् तथाहि पदान्तइत्येव वाच्यं पदात्परस्य सस्य षत्वं न
स्यादित्यर्थः आदिपदस्थानेव बहुच्प्रत्ययः बहुचः परस्य सस्य न षत्वमिति वार्तिककृतां तत्परमेवा
चेत्यादिसाधनाय वचनमेवारब्धं तदाह उत्तरपदत्वेचाऽपदादिविधाविति उत्तरेत्यनेनोत्तरपदं गृह्यते
तस्यपदत्वे इति समासः समासचरमावयवस्य पदसंज्ञायां कर्तव्यायां लुमताल्लुप्ते प्रत्ययलक्षणं न
भवति दधिसेचावित्यादावपि पदसंज्ञानिषेधवारणाय अपदादिविधाविति पदादिनिमित्तविधौ च
कर्तव्ये भवत्येव प्रत्ययलक्षणमित्यर्थः एवं च प्राक्सुबुत्पत्तेः समासोऽत्र नाभिधेयः घनक्रीतेत्यादिसिद्ध ॐ॰
येतदनित्यत्वस्वीकारात् केचित्तु स्तनाभ्युपपदसमासः किंतद्धः सेचाविति षष्ठीसमासः अनभिधा
नात्सोपपदात्तद्विबु अतो दधिषेचावित्यादेर्नापत्तिरित्याह एवमपि बहुद्रर्वस्येति वचनं कार्यमेव

वद्रूपतया अंतस्य तद्धितान्तस्य च बाधात्स्यानिवत्त्वं तस्याप्रवृत्तेः राजपुरुष इत्यादावपि नाल्लोपः व
त्तनोर्घटंगमिति व्याख्यानाङ्गसंज्ञानिषेधात् सुवंतत्वमप्यत्र पदसंज्ञया च नकारस्य लोपात् अहर्ददा १२
तीत्यत्र रेफोऽपि सिद्धः असुपीति निषेधस्य वस्तुतोऽङ्गकार्यत्वेन तल्लक्ष्ये अप्रवृत्तेः न च वार्तिकमते दोषो द
र्वारः अह्नो रविधाविति वचनारंभात् न चाऽसुपीति वचनसामर्थ्यात्प्रत्ययलक्षणं नास्तीति वाच्यं दीर्घाह
निदाघ इति ह्रस्वत्वादिलोपेऽपि रेफापत्तेः एतेनाऽसुपीति पर्युदासः अहर्ददातीत्यत्र दधातेः सुभिन्नस्य
सत्त्वाद्रेफ इति परास्तं न च रुत्वरत्वयोरसिद्धत्वयाऽङ्गबलत्वात्सुवंतेन लोपो दकारस्यैव रुत्वरत्वयोरापत्तिः त
६ दुभयारंभसामर्थ्यात् तद्विषयेन लोपविरहात् अकारस्य रेफरुत्वे वा विशेषाभावात् न च अहर्गच्छत्
दीर्घाह्नो निदाघ इत्यत्र तदारंभश्च वृथेति नार्थः तत्र नलोपनिषेधादिति वाच्यं तथापि अहरह्नीति रुत्वे वैयर्थ्यात्
त् न चैवं दधिसंयुक्तो चरितार्थं अहन् इत्यावर्त्यैकेन नलोपाभावो निपात्यते द्वितीयेन च रुत्वं विधीयत
इति व्याख्यानात् स्यादेतत् परमवाचा परमगोदुहा परमलिहा परमदण्डिना परमदिवा परमकुमार्या इत्य
विभ१ त्रांतर्वर्तिनी सुपि निबंधनयाऽन्तरपदस्य पदसंज्ञया चोः कुः दादेर्धातोर्घः हो ढः नलोपः प्रातिपदिकांतस्य
दिवउत् इको सवर्णे शाकल्यस्य ह्रस्वश्चेत्येषां प्रवृत्तिः स्यात् न च भसंज्ञया बाधः भिन्नावधिकत्वात् समस्त
पदस्य भसंज्ञा उत्तरपदमात्रस्य तु पदसंज्ञेति अत्र भाष्यं भसंज्ञायां सुबंतमित्यनुवर्तनं तेन चार्थ यत्नादावसर्व
नामस्थाने परे यस्मात्प्रत्ययविधिस्तथाभूतः पूर्वः समुदायो भसंज्ञः तदवयवस्सुबंतसंज्ञो वेत्तत्तदपि भसंज्ञं
भवतीत्यर्थः प्रधानशिष्टा च भसंज्ञा राजत इत्यादौ सुबंतावयवाभावेऽपि प्रवर्तत एव कर्त्तुः क्यङ् सलोपश्चे
ति हंसायते इत्यादावि च न चैवमपि सर्वनामस्थाने दोषोद्धारः तत्रासर्वनामस्थाने इति पदत्वनिषेधात्
तथापि सुबंतमित्यनुवृत्तेः प्रतिषेधसामर्थ्याज्ज्ञानं तद्वस्य विधिर्वत्यस्य स्वादिष्विति अवयवस्य तु सुबंतमि
ति प्राप्नुयाः पदसंज्ञाया निषेधात्परमवाचा विस्यादि सिद्धम् न चैवं सुवाक्सुराजेत्यादौ कुत्वनलोपादिः

नप्रवृत्तिः सर्वनामस्थाने परे सुबंतमुत्तरपदस्तत्रैव प्रवर्तन्ते तं सुबंतं तं च पदसंज्ञेनेति तद
धिः समुदायस्य १

५ ग्र सि स.

नान्त्यशासः इत्यत्र शाकाराकारसमुदायस्यैवोपधासंज्ञा स्यात् समुदायावयवसन्निधौ परकाद्विर्वचनन्यायेन
समुदायस्यैव कार्यित्वात् तथा च शास इदङ्हलोरितीत्वं समुदायस्यैव स्यात् इति चेन्न पूर्वपक्षस्योत्सर्गतोऽ
व्यवहितपूर्वपक्षत्वात् समुदायसंज्ञायामपि अलोऽन्त्यस्येति परिभाषयाऽन्तिमस्य गत्वं अथ नार्थके लो न^
त्यविधिरनभ्यासविकारेष्विति प्रतिषेधः स्यात् शास्त्रस्यावृत्तिर्नेत्वं [illegible] स्येत्यभ्यासस्यानर्थकत्वात् इमामित्
इत्यादेः सर्वादेशत्वं वा गुणाद्याऽनभ्यासेऽस्तु विकारस्य भावात्मकत्वे तेनेदं हीत्यत्र अभ्यासलोपः सर्वा
देशापवेति मैवं तस्य लोप इति सूत्रे सिद्धं [illegible] सर्वलोपार्थं तस्येति प्रदोपादानादेतस्याः सूत्रानभिमतत्वात्
भाष्यकृतापि तत्प्रयोजनानामन्यथोपपादितत्वात् तथा हि अव्यक्तानुकरणस्येति पररूपं तावदन्त्यस्य न
भवति नाम्रेडितस्यान्त्यस्य तु वेति ज्ञापकात् अन्यथाम्रेडितस्यैवेत्येव ब्रूयात् ह्यसोरेद्धावित्यत्रापि लोपग्रह
णात् तु ह्यन्तावपि पुनर्लोपग्रहणसामर्थ्यात्सर्वादेशः णोरभ्यासस्य लोपः व्याख्याने अस्तेर्भूत् अस्तेर्वोपपद्ध
वतिर्हीपरे इत्यर्थः यद्वा लोपश्च इति च्छेदः संज्ञायां शाकारादवयवस्य प्रयोजनाभावादादेशसंज्ञिनि सर्वादे
शात्वप्रवृत्तिः द्विशाकारकोऽनिर्देश इति भाष्यं तत्र लोप इति भिन्नपदे तेरप्रत्ययनकृदन्तस्य संज्ञिनार्थवत्त्वाद्धि
१^ भक्तौ कृतायां शाकारः प्रतिनिर्दिश्यते तत्र लोपादेशयवरसंज्ञायां सर्वादेशो लोपः संपद्यते न च फलिपरे
यः संयोगस्तदादित्वात्सोऽलोपेऽपकशाकारकपाठेनैव निर्वाह इति वाच्यं स्पष्टार्थं न तल्लोप इति भावात् अत
एव अनङ् पथालोमिन इत्यादावल्लोपानकृतः न चाभ्यामित्यादौ हलि लोप इति अककारस्य इदम इदोविः
हितस्य लोपस्यान्त्यप्रातियोगिकत्वापत्तिर्दुर्वारेति वाच्यम् अनाप्यक इत्यस्मादनित्यनुवृत्त्या हलीति सम
स्यास्त्र इत्यत्र षष्ठीप्रकल्प्य अनश्च लोपविधानात् अलोऽन्त्यपरिभाषया नकारमात्रस्य लोपे अतो गुण इति
पररूपे च आभ्यामिति सिद्धेः न च तथाप्यत्र लोपोऽभ्यासस्येत्यत्राहेशत्वप्रसंगः नादरवश्यम् अत्राभ्यासत्वाश्र
येलोपोऽनन्तरनेकदेशोऽभ्यासे इति व्याख्यानात् न तु दद्दोदयोरित्यंदिवारणाय सनीत्यस्य जितपयघतीत्यादिवा

न्या^

वद्भविकृते विशिष्टस्यार्थवत्त्वात्स्यादिति पदिकत्वात्तल्लोपो लकिंतु नविशिष्टात्तद्वन्तरोत्पन्नेर्वक्ष्यमाणत्वात्
अन्तर्वर्तिनिविभक्त्या पदसंज्ञामाश्रित्य कुत्वमाभूत् अत्रवदंति प्रत्ययलोपइति सूत्रएवं उत्तरपदत्वेच पदा
दिविधौ बहुव्रु पूर्वस्येति पठनीयं पदादिविधावेवप्रत्ययलक्षणं नतु पदान्तविधौ इति नियमार्थं चेदं वा
क्यद्वयं एवं वचनग्रहणपरित्यागाल्लाघवम् एवं च समावपि पदं इत्यपि नास्ति पूर्वोक्तप्रकारस्यानादरणात् अतय
वहूल्लघ्वादिसूत्रे भाष्यं अथ समावपि पदं भवत्येवमप्युभयतस्याशास्त्रंत्विति अभूवन्नित्यत्र जस्त्वं भवति
आत इत्यस्य नियमार्थत्वात् नचदेवदत्तयाततया नकारेत्यत्र लुके बाधित्वा परत्वान्नित्वादिस्थावाम इति नेः
घालुकि प्रत्ययलक्षणेन तिङन्तत्वादामन्तस्यातियातसूतनः यदस्यनियाननिषेधश्चस्यादिति वाच्य येन
नाप्राप्तिन्याये न लाघवस्याप्यामेवतिवादीन्बाधित्वा लुक्यत्रेनेः तङ्क्रमम् आमिति लोपात्तस्य चानियानत्
त स्माच्चनियान इति नचैवं वदतेत्रापि प्रकृत्यादौ षष्ठीं तस्य विहितायुष्मदस्मदोरादेशाः स्युरिति वाच्य स्य
ग्रहणेन स्रूयमाणायाविभक्तावेवतद्विधानात् समयेतिष्ठस्त्रीवेत्यादौ समयं माह्वासीरित्यर्थावगमाति
छनेरदानेोष्टत्तेः नचविभक्तिविशिष्टयोरेवतत्समादिन तत्प्रकृतिभागमात्रस्येत्यर्थस्य ग्रहणमिति वाच्य
द्वितीयानामितिनिर्देशेनापितत्सिद्धेः अथवित्रेणोलगितितलोपेकृते अवधिभवतादस्तुः आगापिभवता
ग्रामः अथगापिभवतात्त्ववाक् इतिहृतिलिङादेशानस्युरितिचेन्न लङियदाई धातकतस्मिन्विषयेतेः
षाविधानात् लादेशात्पूर्वमेवतेषांप्रवृत्तेः तस्माद्धस्त्वेनागस्यकार्येन भवतीतिसिद्धान्तः ॥ अचेोन्त्यादिटि ॥
निर्द्धारणेषष्ठी जातावेकवचनं अचांमध्येयोन्त्यः तदादिशब्दस्वरूपं टिसंज्ञं प्रदेशाः टितआत्मनेपदानां
नि^ इत्यादयः अन्त्यग्रहणादिर्घस्येतिबहुव्रीहिः ^ तत्य सापेक्षत्वात्समासः यद्यत्रहलन्तेनत्वनहिशिष्टस्येवंसत्ता
तेनकृते इत्यादावकारस्य कुर्वीत इत्यादौचआकारमकारयोरेव ॥ अलोन्त्यात्पूर्वउपधा ॥ अस्मादलः
पूर्वोवर्णउपधासंज्ञः चेतति शुंगतलसूप [illegible] स्येचतिइकारस्यगुणः ननुसर्वस्मादव्यवहितपूर्वोस्त्येवोपादा
५^

५ प्र. सि.कौ

व्याकरणेन शास्त्रपरत्वान्नेनार्थपरत्वसिद्धेः इतिकरणस्य पदार्थविपर्यासकरत्वात् नेत्रेव पूर्वशास्त्रो।
च्चारणापत्तेश्च एतत्सूत्रारम्भोपि तयालाघवात् तस्मात्समस्यन्तात्रकरणमेव तस्मिन्निति सर्वनाम्नाग्र
हिरस्तीति विशेषणानां संग्रहात् तस्यापत्यमित्यादिवत् तस्मादित्युत्तरस्य ॥ पंचमीनिर्देशोऽत्र रस्यैव का
र्यस्यात् तच्चाव्यवहितस्य तेन निङ्क्ति निङः इति निपातनात् श्रिमीलेइत्यत्रैव नत्वीलेः श्रिमित्यत्रापि दिग्योग
लक्षणा चेयं कारकविभक्तेरसंभवात् तथा च उत्तरशब्दवत्पूर्वशब्दस्याप्यध्याहारस्यापत्तेः व्यवहित
स्याप्युत्तरस्यकार्यप्रसंगाच्च नियमार्थमिदं तेन उगस्यानेत्यत्र उदस्थानं भोरित्यस्य न प्रसंगः यद्वातिके
तस्मिंस्तस्मादितिसूत्रे चोत्तरयोर्योगविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनमित्यादावपि तस्मा
दितिपञ्चम्यन्तानामुत्तरकरणं नत्वत्र तस्मादितिशास्त्रस्तत्रैवेतदुपस्थित्यर्थम् पूर्वोक्तयुक्तेःनत्वत्रप्रयो
जनाभावादेवर्णकारस्य तस्मान्नुडचि हलः अतआदेरिति दीर्घादकारात्पूर्वस्यागस्यासंभवात् अभ्यास
स्याङ्गात्पूर्वत्वनियमात् तस्माच्छसोनः पुंसीत्यत्रापि तन्नानित्यादौ पूर्वसवर्णदीर्घात्पूर्वस्य [illegible]कारस्यनः ग्रा ९
त्वापत्तेः षष्ठीनिर्दिष्टस्यादेशो न त्वमाभूदिति शक्तिसंभव[illegible]सो न त्वमिति व्याख्यानेन वारणात् अयमाद्यः उ ग्रा ९
च्चरितस्याप्युपलम्भ इति प्रयोजनं दीर्घीभूतादाकारात्पूर्वस्योच्चरितप्रकृतिकस्य सत्त्वात् एवं तस्मा[illegible] नु ९
दित्यत्रापि अनश्च इत्यादौ लभनकारात्पूर्वं उरण्मो माभूदिति योजनीयम् इह सूत्रद्वये षष्ठी प्र
कृतिपत्तोपि भाष्ये उक्तः सप्तम्या षष्ठीस्थाने योगे निःस्तु चादिह षष्ठीत्युत्तरसूत्राच्च समस्यार्थीनिर्देशोः व्यव
हितस्यपूर्वस्य षष्ठी पंचम्यर्थनिर्देशो नाहशास्त्य उत्तरस्य षष्ठी स्यादित्यर्थः इकइत्यादौ षष्ठ्याः सत्त्वात्तद
नुवादेन पूर्वस्यैवा नतूत्तरस्य नवा पूर्वस्यापि अव्यवहितस्यैत्यत देववोध्यते अग्नेर्ढक इत्यादौ तु षष्ठ्या
पि प्रकल्प्यते अन्यत्पूर्ववत् साचानियतयोगात्स्थानषष्ठी यत्र भवेत्स्थानषष्ठी तस्येव च कार्यनियमा
र्थोसिद्धः यत्रतूभयनिर्देशस्तत्रोभयोर्न प्रकल्पकत्वं कार्यित्वनिमित्तत्वयो एकस्मिन्नत्वयो उ

वर्णाय सादावितिसत्विशेषणस्यापिपतन्तीतिवारणाय मीमेत्यादिप्रकृतिविशेषणानां उक्तोकर्मकृत्स्यअ
णावेतिस्रुस्रुन्नतिगामित्यादिवारणाय विषयविशेषणस्यचलाभार्थमेवात्रग्रहणमितिचेन्न अत्रहस्यैवैषां
सिद्धेः नच तथापिविभाषाभवद्भगवद्घवतामोत्त्वावस्येतिवार्तिकेनविहितगंकारोवकारमात्रस्यस्यादि
तिवाच्यम् वस्येत्यपहाय अवस्येतिनिर्देशसामर्थ्यात्सर्वादेशत्वसिद्धेः तस्मात्समुदायसंज्ञायामपिनदोषः
संयोगोपधेत्यादिव्यवहारोप्यत्रसंगच्छते पदान्तरेणचवयवधर्मस्यसमुदायेसमारोपोबोध्यः यद्वाअलइति
जसन्तं नचपूर्वइत्येकवचनान्तेनसामानाधिकरण्यानुपपत्तिः पूर्वइतिजसंतस्यैवच्छेदात् अन्त्यपालत्व
लाभस्त्वार्थः यद्वा अलइतिनिर्द्धारणेषष्ठी जातावेकवचनं अलामध्येन्त्यात्पूर्वोलइत्यर्थः ॥ तस्मिन्निति
निर्दिष्टे पूर्वस्य, सप्तमीनिर्देशेपूर्वस्यैवकार्यंस्यान्नतुनिर्दिष्टेअव्यवहितोत्तरेति लिङ्गाहनेनैरन्तर्यस्यादेशि
नाचोच्चारणस्यलाभात् नियमार्थश्चेदं इकोयणचीत्यादीनामनियतत्वप्रवृत्तिप्रसंगनकोयत्न किंतोभावस व्यवहितस्या
त्प्रतियोगित्वात् यदीदंवचनंनस्यात्तर्हि पूर्वस्यपरस्यसमीपस्यानन्तरस्यव्यवहितस्यवाइकोविनिगमका
भावाद्यणादेशःस्यात् सतित्वस्मिन्पूर्वस्यविधास्यतीति इकोयणचीत्यत्रदहिभावलक्षणासप्तमी अवि
सतीत्यर्थः सत्वचपूर्वपरोभयसाधारणं एवंउपश्लेषोपितथाचकार्यप्रतियोगित्वनिमित्तत्वयोरेकत्रउ १०
गपदसंभवादध्युदकमित्यादौयणयोगेणाहृयोर्यण्स्यात् अतःपूर्वस्यैवेतिनियम्यते अग्निचित्त्येत्यत्रव्यव
हितस्यैवापिप्रासस्त्वव्यवहितस्यैवेति यत्तुसतिसप्तम्यांतस्मिन्नितिपरिभाषानोपतिष्ठत इतिआमलोप
इतिसूत्रेभाष्यकैयटयोःकलङ्कं तत्सर्वपदिनाणःप्रोक्तिवादमात्रं नतुतस्मिन्निनिभाष्येयत्रनिर्दिश्यतेय
ष्यातस्मिन्नाणौयुष्मकास्माकौ तत्रैवायंप्रवर्तते गवित्ययमाहेत्यादौइतिभाष्येनमात्रस्वरूपस्यैव
बोधात् नचतत्रप्रयोजनाभावः हेपौष्माकीणप्रसभ्येदेहि हेआस्माकीनयुष्मभ्यंददामीत्यादौर
त्वेनाभ्यांयदस्यादेशाव्याहतेः फलत्वात् मैवं लोकेभाष्यस्यार्थेपरत्वादितिनाभाष्यपरत्वकल्पनात्

५
प्र॰
सि सू॰

गाह्य अन्यथा ल्लकारो नन्तरं लकुप्रसंगे श्रुतेर्व्यविरेवेति नियर्त्वेन वकारस्य ह्यं स्यात् ननु प्रत्ययविधावपि इति
न्न किंञ्च इति पंचम्याः तन्न इति प्रथमा षष्ठ्याः षष्ठी प्रकल्पकत्वं स्यात् न चैष्टापत्तिः आदेशान्तरप्रतिनिर्दे
शाभावात्स्थानस्थानादेशे दोषाभावादिति वाच्यम् स्थानिन एवात्र निर्दिष्टत्वादादेशस्यापदेशाभावा
दित्यस्याप्यनुपपत्तेः स्थानिनो ऽप्युपस्थितिकालस्य एव निर्दिष्टस्याभिश्रुवेत्तथा प्रतिपन्नस्य इत्यन्तरानन्वयात् अत्राहुः
परत्वविशिष्टस्य सन उत्पादनेन तोपन्नीणाथाः पंचम्या नास्ति प्रकल्पकत्वमिति षष्ठ्यास्तु वाक्यविभक्तिः
सवयथा प्राप्तस्य प्रत्ययविधौ च तस्य पूर्वं समप्रसिद्ध्या ऽनुवादानुपपत्तेः अनियमेन नियमकारिण्याः परिभा
षाया अनियमप्रसक्त्यभावे प्रवृत्त्यनर्हत्वाच्च तस्मात् प्रत्ययविधौ पंचम्यो न प्रकल्पिकाः इति॥ स्वं रूपं शब्दस्या
ऽशब्दसंज्ञा॥ शब्दस्य स्वकीयं रूपं संज्ञिशब्दशास्त्रे या संज्ञा तां विना इति दीक्षिताः नव्यास्तु अणुदित्सवर्णस्येत्या स्तु^
दिसूत्रस्थ संज्ञानां संज्ञासमर्पकत्वेन षष्ठ्यन्तानां च संज्ञिसमर्पकत्वेन रूपं शब्दस्य संज्ञा स्यादित्यर्थः न
याव प्रत्ययलोपसूत्रे भाष्यं स्वं रूपं शब्दस्याशब्दसंज्ञा भवतीति निर्दिष्टे तेनापि इति भविष्यतीति अत्रापि रूपं शब्दस्य संज्ञे संज्ञा^
तीत्याहुः हृवदन्नस्तु ग्राह्यमित्यध्याहार्यं शब्दस्येति कृत्यानां कर्तरि वेति षष्ठी तेन शब्दः स्वमेव रूपं ग्राह्यतीत्य
र्थः रूपपदं चा ऽन्यादिपदवृत्तिजातिपरं व्यक्तिद्वारा च कार्ययोग्यतिआवश्यको तेन अग्नेर्ढगित्यग्निशब्दादेव ग^
न तद्व्यक्तिशब्दात् अशब्देति किं उपसर्गे घोः किरित्यादौ शब्दस्वरूपमात्रादि किं तर्हि यथा रूपं यथा तवयवग्गेह्ये त्व^
रन्निति तेनन्द्रुधातोः शब्दार्थान्नकिप्रत्ययः स्वपदं च यघयः शब्दस्य साब्दस्तत्परम् शब्दसंज्ञेति सप्तमीसमासः ष
ष्ठीसमासे कर्मादिषष्ठ्यसंज्ञास्यस्वरूपग्रहणापत्तेः न च रूपग्रहणं विनापि स्वशब्देन तदेव ग्राह्यं प्रतीताउपदे
शानपेक्षत्वादसाधारणत्वादन्तरंगत्वान्नियततोपस्थितिकत्वाच्च अर्थस्य प्रतीतौ शक्तिग्रहापेक्षत्वात् पर्यायान्त
रबोध्यत्वेन साधारणत्वात्पदधीनत्वप्रतीतानविषयत्वेन बहिरंगत्वात् अनुकरणाद्दृष्टा यामर्थानवगमात् नियतो
पस्थितिकत्वाच्चेति अत्राहुः इहार्थोऽपि विवक्षितो रूपवदिति तापनार्थं रूपग्रहणं तेनार्थवद्ग्रहणेनानर्थकस्य

गपेत्येकस्मिन्नसम्भवात् एकः पूर्वपरयोरिति नित्यापकाच्च अन्यथा आ[illegible]ण इत्यादौ आदितिपंचम्या ईतीति
मा सप्तम्याः षष्ठीत्वं प्राप्तीति सप्तम्या[illegible]दितिपंचम्याः षष्ठीत्वं कल्प्यन इत्युभयोर्गुणादेशः सिद्धो नेदं यथार्थं न
तथा च नत्वैकेयटः सूत्रद्वयप्रमाणत्वात् द्वे अपि वृत्ती प्रकल्पिके षष्ठ्या विभक्तीनेनात्र तापनार्थत्वमाश्रितं द्वे
पंचमीसप्तमीरूपे विभक्ती षष्ठ्याः परस्पेरेतरत्र षष्ठ्या इत्यर्थः किं तु परत्वानवकाशत्वाभ्यां नियमः एतत्व
षष्ठीप्रकल्पन एतेनापि व्यवस्था तथा हि आने मुगित्यत्र सप्तम्यनवकाशा अतो येय इति पूर्वेत्र च विनाप्यो
याश्च न इति पंचम्याः षष्ठी प्रकल्पयति पर्वईदास इत्यत्रास इति पंचमी निरवकाशा आने इति सप्तम्याः पूर्वे
त्रसावकाशायाः तास्यनुदात्तेदिति सूत्रेऽपि सार्वधातुक इति सप्तमी अयमन्तस्मिन्नर्थे [illegible] इत्यत्र सावकाशेति
तासेरित्यादि पंचम्या एव षष्ठी प्रकल्पयति लसार्वधातुके इत्यनास्यादिभ्यस्तस्य अनुदात्तमिति न च तत्र
ल सार्वधातुकमिति प्रथमांतपाठात्सप्तमीति वाच्यं तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशः अयमन्तस्मिन्नर्थ इति
ला वृद्ध्यमा[illegible]नात् वहेः परेषामपि लोपः स्यादित्यर्थः अतु एवं भूवववहोरिति इत्थं पृथक् षष्ठीनिर्देशः गोतो णिदि
ति पंचमी सर्वनामस्थान इति सप्तम्याः षष्ठी प्रकल्पयति गोषानस्य णित्वे प्रयोजनाभावाच्च नचनिकाति
गोरित्यत्र पूर्वस्य वृद्धिः फलं गोमतं प्रतिनिष्ठते वनं गताः न आमि सर्वनाम्नः सुडित्यत्रापि पंचम्यनव
काशा[illegible]मीति सप्तम्या अन्नवत्र सावकाशायाः षष्ठीं प्रकल्पयति न च आदित्यनुवृत्त्या पंचम्या सामा
नाधिकरण्यादवर्णान्तात्सर्वनाम्न इति पंचम्यपि कृतार्थेति वाच्यं तथापि यथोद्देशपक्षे परत्वात्सप्त
दित्यनुवर्तस्यैनेत नत्वं हृत्वे[illegible]त उक्तं उभयनिर्देशे विप्रतिषेधात्पंचमीनिर्देशः इति इदं चाभ्युपेत्युक्तं व
र्णो म[illegible]मेतराणामित्यादिवारणाय सर्वनाम्नो विहितस्याम इति येषामित्याद्यर्थं अकारात्परस्येति व
व्याख्यानात् अकारान्तात्सर्वनाम्नो विहितस्याम इति व्याख्याने तु येषामित्यादौ नस्यात् दीर्घादित्यत्र
तु षष्ठ्या स्थाने पंचमी चेदसमर्थयात् तेन दीर्घस्य वनकनतस्य विभाषा सेनास्वराज्येति लि।

+ एवं वहोर्लोप इत्यत्र वहेरिति पंचम्यनवकाशा इत्यैपस्तु इति सप्तम्याः षष्ठी प्रकल्पयति +

स॰ प्र॰ सि॰ स॰

स्तत्वन्यश्रेयाः इदं च न्यायसिद्धं पर्यायाणां सहप्रयोगाभावात् सामान्यविशेषाणां च वाच्यार्थाभावात्सामान्येन
विशेषाणामानेयात् ह्लस्यैवाऽनुपपत्तेः पित्पर्यायवचनस्य च स्वा[illegible]र्थं चकारात्तद्रूपस्य विशेषाणां च ग्रहणा
त्त्विषः रोषिंवृषः श्वश्वपोविस्वपोर्वरंदेवा वाचनिकमेव जित्पर्यायस्यैव राजाद्यर्थं सभाराजामनुष्यपूर्वा इनसभे
ईश्वरसभं नेह राजसभा हरिश्चन्द्रसभा इदमपि न्यायसिद्धं नस्त्र[illegible] अराजेति पर्युदासाश्रयणाद्राजसदृ स्वं रूपं १
शानां तत्पर्यायाणामेव ग्रहणात् न च स्वस्यापि स्वपर्यायत्वं भिन्नत्वे सत्यभिन्नप्रवृत्तिनिमित्तकत्वं पर्यायत्वमि
ति स्वीकारात् विशेषणेन स्वस्य विशेष्येण च विशेष्यवाचकपदस्य वारणात् इनशब्दो राजशब्दपर्याय स्य १
स्य राजशब्दाभिन्नत्वे सति राजशब्दाभिधायकानां वच्छेदकथमीवच्छिन्नशावचनाकरवर्थः किं तस्य विशेषाणां च
मत्स्याद्यर्थं पक्षिमत्स्यमृगान्हन्तीति मात्सिकः शाफरिकः न तु पर्यायवचनानां अनिमिषान्हन्तीति मीनस्येष्य
त इति भाष्यं मैनिकः स्वरूपविधिरेषोऽत्रापि निर्देशः कर्तव्यः तेन स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणमिति
व्याख्यातारः इदमपि वाचनिकम् ॥ अणुदित्सवर्णस्य चाप्रत्ययः ॥ अविधीयमानो ण[illegible]उदिच्च सवर्ण
स्य चकारात्स्वस्य च संज्ञा स्यात् अत्राण् परेण णकारेणेति प्रागुक्तं अस्य प्रवृत्तौ ह्लीस्यात् मोलीस्यात् एवं च
नयः लयः अरोटश स्लवः पवः उदित्परः कवो किरति अन्तेदश इत्यत्र कवर्गकारस्यान्तर्ग्रहण दीर्घाणा
मनणत्वेन सवर्णग्राहकत्वं नास्तीति सिद्धान्तात् एतेनाच्च आविभक्तादित्यादिकं व्याख्याते अप्रत्यय इति
पर्युदासाच्च दीर्घाणामनणत्वं च ग्रहणकशास्त्रस्यैव वाक्यापरिसमाप्तिन्यायात् अणि पाठेन तेषामप्यु
पादाने तेन कारकर इत्यादौ रपरत्वं तस्माद्दीर्घाणां ग्राहकत्वं नास्ति ग्राह्यत्वं त्वस्त्येवेति फलितार्थः अप्रत्य
य इत्युदितो न विशेषणं उदहोस्युः चकारग्रहणाद् अतएव भाष्यमानाः णस वर्णान्न गृह्णातीत्याहुः तत्कृत
उदयत्वनोदितः प्रतिज्ञानुनासिक्याः पाणिनीया इत्यभ्युपगमात् अप्रत्ययः किं विधीयमानानां प्रत्ययादेः
शाणमानां ग्राहकत्वमाभूत् तेन अत इत्य इदमस्राच्छुवो ऊक इत्यादौ न दीर्घादि नचरमादीनां अनणत्वादेव

निसिद्धं ज्ञापकवशादर्थस्य स्वं रूपमिति वचनाच्च शास्त्रस्येति सिद्धमर्थवद्ग्रहणं तेन काशेऽइत्यादौ शेऽइति प्रग्र
ह्यत्वं नेत्यादि यत्र त्वर्थवद्रूपेण शास्त्रेणाश्रीयते तत्रानेदृग्रुपनिष्ठेन यथा वर्णग्रहणोऽष्टे टेरेते तेनानर्थकस्यापि
टेरेत्वं भवति अत्र भाष्यकृता नैतत्तत्त्वमर्मवभ्य लोके ह्ययोग्यतालक्षणेन संबंधेन शास्त्रेऽर्थं बोधयति व्याकर
णेऽपि पञ्चरपत्य टेवन्नाघ्राव ऊंचो भवता इत्यादावर्थ्यपवटत्वाने अग्ने ढगित्यादौ तवर्थेन संहत्र प्रत्ययस्यापोर्वाप
10 र्यासंभवात् शास्त्रस्यैव ग्रहणं अप्राप्तिपदिकादित्यधिकाराच्च नवाधाप्नृसंनेत्यनदर्थमारंभः सुसंस्कारं भाद
वस्तुपातो रयग्रहणात् व्यवहारायनियमः इत्युक्तत्वात् एतेन कुमारीवत्इत्यत्र स्वरूपतिक्रसो व्याख्यातः ईहल्य
ग्रो^ विल्य वस्तु शास्त्रस्याकारां तत्वाभावादेव नोपादाने पंगुदासाभावेपूरहणत्रसांकिलस्येव पंगुदासाभ्युप
दिशि व्यवस्थिता देशाः प्राग्देशाः उत्तरापरस्यां तूदग्देशाः तदुक्तं प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती वाहीकदेशास्तु प्रागुदग्भ्यां बहिर्भूताः बहिषष्टिलोपश्चेति निपातनादि
ति विवरणकाराः दीक्षितास्तु प्रव्ययाध्यवितिसृदीच्यग्रामात्तुवुञ्‌चोत्तरपदात् इत्यस्यावकाशः शिव
पुरे शैवपुरः तन्नः सएव शाकलनाम वाहीकग्रामः इहोभयं प्राप्नोतीति इति भाष्ये वाहीकस्याप्युदक्त्वे लभ्य
ते हरदत्तादिभिरपि तथैवानुवादाच्च वाहीकदेशस्वरूपं तु कर्णपर्वणि पंचानां सिंधुषष्ठानां मन्ते ये समाश्रि
ताः वाहीका नाम ते देशा न तेन प्रदिवसं वसेत् धर्मबाहिर्भूतत्वाद् हासिका इति तात्पर्यं शतद्रुरिपाशा इरावती
वितस्ता चंद्रभागेति पंचनद्यः सिंधुनदस्तु षष्ठस्तन्मध्ये देशो वाहीक इति न व्याख्या शुक्लमन्येन्तरसंपिनेव
वहितश्च वहीकश्च विपाशायामपि शाकेन [illegible] पोरपन्य वाहीकानेषामतिप्रजापतेः पतद्द्विवचनेन वा
वाहीकग्रामेभ्य इत्यादावुपयोत्स्यत इत्याहुः ॥ ॥ इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य
प्रथमपादे नवममाह्निकम् ॥ पादश्चायं समाप्तः ॥ श्रीः ॥

20

प्र॰ ॥ ॥ सरूपाणामेकशेषएकविभक्तौ ॥ स्वाद्युत्पत्तिसमयावस्थसमयप्रकृतिकानां येषां शब्दानां सारूप्यं तेषां मध्ये एक एव
सि॰स्त शिष्यते वृद्धौ वृद्धाः यद्यपि समानानामित्युक्तौ रूपत्वात्समानपदस्यानन्यार्थत्वावगमे लाघवं सरूपाणा-
२८ इ॰ मित्यत्र तत्पद... यार्थावगमे पूर्वकालपदार्थावगमात्स्यात्प्रतिपत्तिगौरवं तथापि शब्दार्थोभयकृतसाम्यवि-
वक्षायामस्याप्रवृत्तेः इत्यादावेकशेषः स्यान्नवताः याता इत्यादौ त्वर्थभेदात् स्वरूपमित्यत्र रूपग्रहणेन व्याक-
27 रणेऽर्थाङ्गीकारस्यापि ज्ञापितत्वात् रूपग्रहणेन शब्दस्वरूपमात्रगतत्वस्यैव गृह्यत इति न दोषः ननु ए-
कग्रहणं व्यर्थं शेषशब्दस्य भावसाधनत्वपदेशाग्र्यम्यादेकस्यैव शेषसिद्धेः शिष्यते शेष इति कर्मसाध-
नेत्वेकत्वस्याविवक्षितत्वादेकस्यैव शेषसिद्धेः मैवं व्याघ्रयोरपि न्यायादनेकस्यापि शेषापत्तेः द्वितीयेपि
ग्रहणं मा भूदिति वक्तुं स्वकार्ये संख्याया अविवक्षितत्वात् अथ शेषग्रहणं व्यर्थं सरूपाणामेकः साधुर्भवती-
ति वाक्यशेषाध्याहारेणान्तरतमस्यैकस्यादेशस्योपपत्तेः मैवं एकस्यादेशत्वप्रसंगात् षष्ठीस्थानेयोगे-
ति नियमात् ततश्च ग्रामश्च ग्रामश्च ग्रामौ समुदायघटकयोर्द्वयोरपि शब्दयोरुदात्तानुदात्तत्वादन्तेनानुदात्त-
त्वानुदात्तस्य सर्वानुदात्तस्य वा ग्रामशब्दस्य प्रसंगात् उदात्तद्वयानुदात्तद्वयवतः समुदायस्य स्थानेन तदन्यतर-
वत एवादेशस्यान्तरतमत्वात् अथैकविभक्ताविति किमर्थं न च व्यर्थः प्रयोजनरहितत्वाभावात् क्वादय-
ति ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहीत्यादावेकशेषवारणार्थमिति वाच्यं सहविवक्षायामित्यस्या-
वश्यकत्वात् अत एव इति तेनानुपस्थितेरेकशेषाभावः संगच्छते परस्परविशेष्यविशेषणभावानापन्ना-
नामेव तत्संभवात् बहुव्रीहौ तद्वर्तिपदार्थानां विशेष्यविशेषणभावसत्त्वात् वक्ष्यति द्विवार्तिककारः न
वार्थविप्रतिषेधाद्युगपद्वचनाभाव इति युगपद्वचनं सहविवक्षा यत्र शिष्यमाणेन लुप्यमानार्थाभिधानम् २८

तृ वि

मर्थत्वञ्चैकशेषः कर्तृत्वकर्मत्वसंप्रदानत्वादयश्चैकेन युगपदेवोपस्थितमशक्याः युगपदेकस्माद्धिभक्ति
द्वयानुपपत्तेः चतुर्थ्यन्तस्य शेषे च ब्राह्मणेभ्य इत्यत्र कर्तृत्वस्य तृतीयान्तस्य शेषे ब्राह्मणैरित्युक्ते संप्रदान
त्वस्यानवगमात् एकेन भिन्नेन वा पदेनोपस्थितानां एकरूपेणैव प्रत्ययार्थान्वयादित्यर्थः एवं तस्य
सारूप्योपलक्षणार्थतायावश्यमाणत्वात् स्यादेतत् अनेकव्यक्तिबोधयिषायामनेकशब्दप्रयो
गप्राप्तेन त्रिद्वयर्थतावदयमारंभः तत्र च विरूपानेकशब्दप्रयोगस्य धवखदिरा विसादौ दर्शनात्
सरूपैकशेषारंभवत् द्वन्द्वारम्भादौ सरूपैकशब्दप्रयोगदर्शनाद्विरूपाणामनेकशेष इत्येवारभ्यतां द्वन्द्वा
न्तमात्रस्यैतद्भावस्य चोभयत्र साम्यात् प्रयोगानुसरणेन तु न किंचिदारम्भं व्यक्तिपदेनैकस्यापि द्वा
द्वस्य वकर्थबोधकत्वसंभवात् दत्तथैकशेषारंभप्युनिर्वाहात् शब्दशक्तेर्वचनमूलकत्वाभावात् किं
च सरूपैकशेषे गौरवं द्वयोरेकशेष एकस्य यदा त्रयाणामेकः शिष्यते तदा द्वयोस्तु तरादीनामेक
शेषश्चादीनां निवृत्तेरेकस्य च प्रवृत्तिर्वाच्येति प्रवृत्तिनिवृत्तिलक्षणविषयभेदाद्बुद्धिगौरवापत्तेः शे
षशब्दस्य निवृत्तिविशिष्टावस्थानवाचित्वात् विरूपानेकशेषारंभे तु प्रवृत्तिविषया बुद्धिरेकरूपैवेति
वे॰ लाघवं उच्यते द्वन्द्वे एकेन तादात्म्य एकशेषस्यैव विधेयत्वात् इतरत्वनेकशेषविधाने प्रस्थानद्वयापत्त्या ला
घवादेकशेषस्यैव युक्तत्वात् इदंतु बोध्यं एकपदस्य शब्दार्थीकरीत्या सजातीयान्तरव्यावृत्तिस्वार्थकतया शब्दा
न्तरनिवृत्तिरेव विधीयते अवस्थानं तु सिद्धत्वादनूद्यते अतएव कैयटेन प्रवृत्तिनिवृत्तिलक्षणविषय
भेदादित्यंश आपाततो नादृतः द्वन्द्वादिवदवस्थानस्यापि विधेयत्वप्रतीतेः निवृत्तेरवस्थाने विशिष्टे च
निवर्तमानपदसमभिव्याहाराभावरूप प्रतियोगिप्रसिद्धिसापेक्षत्वमाणानत्तदसमभिव्याहृतत्वशब्दान्तर

नी॰ ५॥

वा॰

प्र॰ स्यल एव अलौकिकप्रक्रियावाक्य एव स्वलभ्यासादेतत् षड्रूपताः संभवंति तथाहि समुदायादेकवि
सि॰सु॰ भक्तौ परत एकशेषो विधीयते एकशेषस्य संख्यावाचित्वेन प्रसिद्धत्वात् ननु ड्याप्प्रातिपदिकादित्यत्रै
२८ कवचनांतानामेव द्वंद्वः क्रियते वृत्तिपदार्थानां सर्वत्रैकत्वभानस्यौत्सर्गिकत्वात् येष्वा कीन इत्यादौ
आदेशादिबलादेव बहुत्वादिप्रतीतेः तथा च एकत्वस्य विवक्षितत्वादेकस्मादेव प्रातिपदिकात्स्वादयो न तु स
मुदायात् कर्तुरीप्सिततममित्यादौ तु द्वयोर्बहूनां वा ईप्सितस्य कर्मसंज्ञादर्शनाल्लक्ष्यानुरोधात्र संख्या
विवक्षेति वैषम्यं तथा च समुदायादेकस्याविभक्तेः प्रवृत्त्यभावादसंभव एव तदुक्तं एकविभक्ताविति
चेत्राभावाद्विभक्तेरिति मैवं स्वार्थमादाय अवयवयोरिव परस्परोपस्थाप्ययोः संसर्गं समुदायार्थस्याप्यवय
वार्थातिरिक्तस्यानुभूयमानत्वात्तमादाय समुदायस्याप्येकप्रातिपदिकत्वाद्विभक्त्युपपत्तेः न चार्थवत्स
मुदायानां समासग्रहणं नियमार्थमिति वाच्यं तस्य सजातीयविषयकत्वात् सर्वनाम्नामेव व्याहतेः रा
जदर्शीत्यादावुपपदादिसमासे पि पूर्वपदस्य नलोपादिपदकार्यानुरोधेन सर्वनत्वात् तथा चैकाज्द्वि
र्वचनन्यायेन समुदायादेव द्विवचनाद्युत्पत्तेः तैरेवावयवार्थानां संख्यान्वयात्मकान्तु यथेष्टसंपत्तेः नच
राजन् राजन् औ इत्यत्र परत्वान्नित्यत्वाच्चोपधादीर्घे कृते वैरूप्यादेकशेषो न स्यादिति वाच्यं विरूपाणामपि स
मानार्थानामिति तत्संभवात् यद्वांतरंगत्वादेकशेषः संबुद्धिभिन्नसर्वनामस्थानरूपविभक्तिविशे
३॰ षपर्यायापेक्षमाणस्य दीर्घस्य बहिरंगत्वात् न चैवं द्वंद्वेपि द्वंद्वं विनैव समुदायाद्विभक्तिप्रसंग इति
वाच्यं तद्धितावनेकसुबंतमित्यनुवृत्त्या उक्तन्यायबाधात् तथा च वृत्तवृत्त औ इति स्थिते एकशेषप्रवृत्ति
रित्येकः पक्षः यथाश्रुत एव विभक्तौ परत एकशेषः ननु वृत्तस्य वृत्तस्य इति स्थिते विभक्तौ परतः सरूपाण २८

मेकशेषस्य विभक्तिनिमित्तकत्वात्प्रकृतिनिह्नवेन तत्र तत्र विभक्तेः केवलायाः प्रयोगः स्यात् नच केवल
योः प्रकृतिप्रत्यययोः प्रयोगनिषेध इति वाच्यं तयोः परस्परलोपप्रयोजकत्वे अग्निश्चिद्दियतीत्यादौ परस्प
राहित्येपि प्रयोगदर्शनात् नवा सेषां सकाराणां संयोगान्तलोपेन निस्तारः संयोगान्तयस्य दत्तं दत्तस्य तद्वि
धानात् हलन्तस्य सस्य इति स्थितेन च हलन्तस्य इत्येकस्य इति द्वितीयस्य इति च तृतीयं पदमिति कस्यापि पदस्य सं
योगान्तत्वाभावात् एतेन संयोगादिलोपापि परास्तः मेवं संयोगान्तलोप इति भाष्यस्य संयोगस्यान्तः स
कारस्तस्य लोपः सवह लक्ष्यादिसिद्धये इति व्याख्येयत्वात् इति द्वितीयः अथवा समासादिकविभक्तेः प
रत एकशेषोस्तु प्रथमसूत्रात् द्वन्द्व इत्यनुवृत्तेः तथा च हलश्च हलश्च हलश्चेति द्वन्द्वे हलहलहलेत्यत्रैकशेष इति तत्र त
त्र विभक्तेः लोपोपत्तिति लोपात्तश्रवणापत्तिरिति तृतीयः यद्वा पृथक् सर्वेषां विभक्त्यन्तानामेकशेषः एक
विभक्तावित्यस्मात् श्रयणात् सप्तमीनिर्देशो हि प्रकृतिमात्रनिह्नवे प्रत्ययश्रवणप्रसंगः उक्तरीत्या
तविभक्त्यन्तानामेव निह्नवानेति च तदर्थः अथवा प्रातिपदिकानामेवैकशेषः तथा हि एकविभक्ताविति
ति न क्रियते एकतोऽनपुंसकमिति सूत्रात् प्रातिपदिकग्रहणमनुवर्त्यानुत्पन्नायामेव विभक्तौ सरूपाणां प्रा
तिपदिकानामेकशेषो विधीयते तिङन्तेष्वपि पचलपचल इति स्थितेन कृदन्तत्वात्प्रातिपदिकसंज्ञायां तद
पपत्तेः तथा च लुप्यमानप्रकृतिकविभक्तिश्रवणस्यनापत्तिः नच प्रातिपदिकमात्रसारूप्याविवक्षायां ज
तनीपरिश्लेऽवाचिनोरपि मातृशब्दयोरेकशेषापत्तिः विभक्त्यन्तानामेकशेषपक्षेपि तुल्यत्वात् क्वचिद्विभ
क्तौ सारूप्यसत्त्वात् नवा प्रातिपदिकावस्थायां सारूप्यस्य सार्वदिकत्वात्सर्वत्रैकशेषापत्तिः विभक्त्यन्ता
नां सरूपाणामेकशेषे तु यस्मात्तृतीयादिविभक्त्यौ भारूप्यं तत्रैकशेषो नत्वेकत्रेति वाच्यं अर्थैव प्रातिष

प्र॰ सि॰ सु॰ २९ 29

स्याद्वात्रापेकशेषापत्तेः मातृशब्दद्वयैकशेषे मातरिमनुप्रयुक्ते सर्वस्यैतैरिमन्नेव स्वार्थस्यानवबोधात् इति
पंचमः यद्वा द्विवचनबहुवचनैर्न तावन्मैकशेषः युगपदधिकरणविवक्षायांचैकैकस्य पदस्यार्थद्वयवा
चकत्वात् हृक्षाविन्याशोद्विवचनादिसिद्धिः नचैवं एकशेषेण नित्यन हृक्षश्च हृक्षश्चेति वाक्यबाधापत्तिः
तत्र सहविवक्षाविरहात् भिन्नार्थत्वादेकशेषह्यावाक्यबाधाभावात् इदंच द्वंद्वे इत्यनुवर्त्तमाने द्वंद्वे प्रसक्ते
सतीति व्याख्यानाल्लभ्यते इति षष्ठः ६ तत्र नाद्यः भिक्षाणां समूहो भैक्षमित्यादेरसिद्धेः नचाद्दि भिक्षाभि
क्षाभिक्षाश्याम् इति स्थिते सर्वविधिभ्यो लुग्विधेर्बलवत्वादामो लुकि कृते एकशेषो न स्यात् विभक्ति
परत्वाभावात् नच प्रत्ययलक्षणं न लुमतांगस्येति तन्निषेधात् रामराम औ इत्यत्रापि परत्वाद् द्वंद्वे द्वैत्व
भावादेकशेषो न स्यात् नचानादिवद्भावेन विभक्तेः परत्वमिति वाच्यं उभयत आश्रयेते तन्निषेधात् न द्वि
तीयः द्विवचनबहुवचनार्थं द्वंद्वप्रतिषेधार्थं च वचनान्तरारंभापत्तेः नचानवकाशएकशेषो द्वंद्वबाध
कः तिङन्तेषु एकशेषस्य सावकाशत्वात् कारकभेदेन क्रियाभेदादनेकतिङन्तप्रसंगात् नन्वपरत्वा
त् द्वंद्वः स्यात् नचतदपवादएकशेषः समकक्षतावितिन्यायात् पुनः प्रसंगविज्ञानेपि वृक्ष्यमाणरीत्यास
रूपाभावास्तितेषु दोषप्रसंगात् वृक्षसहक्षस इत्यत्र सर्वस्यापि वृक्षशब्दस्य पालिकानिवृत्तिप्रसंगे सहृक्षा
वित्यापत्तेश्च परस्यैवनिवृत्तौ नियामकाभावात् एवं बहुत्वेपि योज्यं नच संयोगादिलोपेन सिद्धिः
एकस्य पदसंबंधीयः संयोगस्तदादेर्हलोपाभावात् मम इत्यनयोः प्रत्येकं पदत्वात् इदं चोपलक्षणं प
तिनिवृत्तावपि सर्वैकस्य हलङ्याबादिलोपस्यानुपपत्तेः कृतिसीति प्रत्यये प्रकृत्या देपानं हलंतात्ः प्र
कृतेः परेषामेव स्वादीनां लोपविधानात् एवं गोदौदासः सिकता इत्यादीनां नियतवचनानामयत्रैकशेष २९

स्तत्र हल्ङ्यादिलोपादेः शंकितुमप्यशक्यत्वाच्च एतेन संयोगान्तस्य पदान्तस्येति पदाश्रयेणापि निर्वाहो न संभव
तीति दिक् एवं शिष्यमाणशास्तिपदिकोत्तरविभक्तिश्रवणप्रसंगश्चेत्स्यवधेयं नापि तत्नीयः तदुक्तं समास
इति चेत्स्वरसमासांतेषु दोषः इति तथाहि अप्स्वप्राप्स्वप्रेति द्वंद्वे समासांतोदात्तत्वे शेषनिघातेन च यदि पूर्व
शेषस्तदा सर्वानुदात्तत्वापत्तिः अथ परशेषस्तदांतोदात्तत्वप्रसंगः परत्वादेकशेषं बाधित्वा समासांतो
दात्तत्वप्रवृत्तेः नच येन नाप्राप्तन्यायेनैकशेषः समासांतोदात्तत्वापवाद इति वाच्यं तदुत्तरमप्येकशेषप्रवृ
त्तिसंभवाद्विरोधाभावाच्च एवं ऋक् च ऋक् च ऋचः इति स्थिते अंतर्वर्तिन्या विभक्तेर्लुका लुप्तत्वात् प्रत्ययलक्षण
प्रतिषेधाच्च विभक्तिपरत्वाभावादेकशेषार्थं समुदायादस्या विभक्तिरुत्पाद्यते तस्याश्च नास्ति सारूप्यं एको
हि ऋच् शब्दः अपरः ऋच्शब्दः नच समासांतः समासस्यैवावयवो न तूत्तरपदस्येति वाच्यं समासांतकृत
अवधानेन विभक्तिपरत्वाभावादेकदेशानापत्तेः नचायमेव दोषो वक्तव्यो न तत्र सारूप्यमिति वाच्यं समासा
र्थस्योत्तरपदस्यावयवः समासांत इति पक्षमाश्रित्य तथोक्तत्वात् एवं त्वसा च त्वसारौ चेत्यत्र परत्वात् गु
णदीर्घयोः कृतयोः सारूप्याभावात् एकशेषो न स्यात् एवं नौश्च नावौ चेत्यादावनेगकार्यप्राबाद्देशादाव
प्येवोह्यं तथाहि यद्यन्तर्वर्तिन्या विभक्तेर्लुका लुप्तायामपि वचनसामर्थ्यात्प्रत्ययलक्षणं आश्रीयते तदा
द्वैरूप्यं अपसमासविभक्तेरेकविभक्तिपरत्वं तथापि वैरूप्यं तावदवस्थम् एवं प्राख्यातमाख्याते नेम
वमकरणे द्वंद्वस्य सरूपाणामिति वचनं कल्पनीयं अन्यथा तिङ्. तानामेकशेषानापत्तेः नापि चतुर्थः लु
प्यमानायाः प्रत्ययेन सहैव निवृत्तावपि श्रूयमाणप्रकृतिकप्रत्ययस्य श्रवणापत्त्या न लोपविधानस्य हि
बहुवचनविधानस्य द्वंद्वप्रतिषेधवचनस्य चारंभणीयत्वात् नापि पंचमः पक्षमिमस्याः सिद्धेः समर्थस्य

प्र॰
सि॰ हृ॰
३॰

30

यत्तत्र प्रातिपदिकं तस्मान्न हि ता इत्यार्थं तादृशेण कृतेन परत्वादादिवृद्धौ कृतायां वैरूप्यादेकशेषानापत्तेः हरित
स्य स्त्री हरिणी एवं हरिणस्यापि हरिणी च हरिणी च हरिणी विरूपैकशेषानुपपत्तेश्च प्रातिपदिकावस्थायां
वैरूप्यात् एवं श्येन्यो रोहिण्या विरूपयापि यद्यपि हरितशब्दात्संयोगे ङीषा हरिनी निरूपं तथापि हरितश
ब्दस्य स्त्री हरिणी स्त्रीप्रत्ययान्तो हरितशब्द इति यावदित्ति कैयटः प्रातिपदिकग्रहणस्याविभक्तिकत्वाच्च प्रातिप
दिकानां लोके प्रयोगाभावात्सारूप्यस्य पदान्तर्भावेणैव ग्रहणात् तदुक्तं नवा पदस्यार्थे प्रयोगादिति नापि
षष्ठः नह्यस्यार्थायाहृत्यो पदद्वयस्याप्यनर्थकत्वात् एकैकस्यानेकार्थाभिधायित्वानुपपत्तेः अजहत्स्वार्थ
वृत्तिपक्षेऽपि प्रथमस्य हृतस्यैकवचनस्य त्यागायोगात् अस्मत्याः षष्ठीतत्पुरुषायोगात् तत्रापि पूर्वपदस्यो
त्तरपदार्थे उपसंक्रमेण षष्ठ्या प्रयोगात् तथा च भाष्ये सेयं युगपदधिकरणवचनता दुःखा च दुरुपपादा
चेति एतच्च द्वितीये प्रपञ्चयिष्यामः तस्मात्सर्वप्यपि पदात् उक्त एवेति प्राप्ते सिद्धान्तमाह भाष्यकारः प्रातिपदिका
नां चैकशेष इति सिद्धं तथा हि एकविभक्तिनैकशेषनिमित्तं किं तर्हि सारूप्योपलक्षणं एकविभक्तौ लौ
किकप्रयोगे यानि सरूपाणि दृष्टानि तेषामेकशेषः सचाऽनैमित्तिकत्वाद्विभक्तिं नापेक्षते इत्यन्तरङ्गत्वात्सु
बुत्पत्तेः प्रागेव प्रवर्तते भाष्ये प्रातिपदिकग्रहणं चोपलक्षणं तेन हरिण्यादीनामपि तत्सिद्धिः स्वरभिन्नानां पर
रेण क्रियमाण इति वचनात् ङीबन्तस्य हरिणीशब्दस्य शेषः केचित्तु हरित हरिणशब्दयोरेवैकशेषमुभयवा
चित्वेऽप्यन्तरस्य वर्णो वाचित्वं चाश्रित्य स्त्रीप्रत्यय इत्याहुः तेषां पदे स्वरभेदप्रसङ्ग इति कैयटः
नित्यादावप्यनैमित्तिकत्वेनान्तरङ्गत्वात् पूर्वमेकशेषस्ततो वृद्धिर्यद्येकशेषात्परमेव तद्धितोत्पत्तिरिति तन्दो
षः तस्मादयमत्रार्थः विभक्तिपरमत्र स्वादिमात्रपरं सत्यप्याश्रयभेदेन क्रियाभेदे निहत्नभेदायाएव तस्याप्ति

३॰

उ.न्न नेवोथात प्रकर्षाभ्याह्रस्वादीनांच स्वाश्रयाभ्याह्रस्वादिनिमित्तकत्वात् पचन इत्यादि द्विवचनादीनांचकर्त्राद्
निष्ठसंख्याप्रतिपादकत्वात् नचकर्त्रेकर्मणो र्विहितस्य लकारस्यतद्भेदाद्भेद एव युष्मद इति वाच्यं इष्टापत्तेः
लस्येतत्र लत्वजातेराश्रयणात् अनेकेषामपिलकाराणां स्थाने ऽर्थत ग्रानेर्थात् द्विवचनबहुवचनयोः प्रव
त्तेः एकपदंच समानार्थकं तत्सजातीयार्थकं सामान्यवचनविभक्तित्वेन विभक्तिपदादेव सिद्धेः रूपादानस्या
पि वैयर्थ्यापत्तेश्च विभक्तित्वावच्छेदेन सारूप्यस्यासंभवादेवाविवक्षणीयत्वात् तत्सामानाधिकरण्यमा
त्रेण सारूप्यस्य च सरूपपदोपादानादेव लाभात् किंतु विभक्तित्वव्याप्येन सुत्वादिना तत्प्रथमात्वादिना
वेतः ह्रस्वो ह्रस्वाः इत्यादावपि सारूप्याभावात् तात्पर्यवशाच्च प्रकृत्यर्थतावच्छेदक सुत्वादिधर्मेणायावत्त्वगम
इ ते तादृशयात्किंचि[illegible]र्मावच्छेदेन सारूप्यस्यैतद्व्यतिरेकेणैव सिद्धेः अवच्छिन्नत्वेच समभ्यर्थः तथाच विभ
क्तित्वव्याप्यायावंतः सुत्वादिधर्माः प्रत्येकं तदवच्छिन्नयावत्प्रत्ययवृत्तिभसारूप्यमित्यर्थः सुत्वादियाव
द्धर्मावच्छिन्नायाएकस्याः प्रत्ययव्यक्तेरप्रसिद्धत्वात्प्रत्येकमित्युक्तं सुत्वा[illegible]वच्छिन्नयत्किंचिद्व्यक्तौ सारूप्यवा द्य
रणाय यावदित्युक्तं तेन जननीपरिच्छेत्रवाचिनो मातृशब्दयोर्नैकशेषः औटमारभ्य शसपर्यंते सारूप्याभावा
त् एतेनोमरस्त्रश्वस्य स्यसेवकारस्येहानुकर्षणात्सरूपाणेवेत्यर्थोलभ्यत इत्यपास्तं उक्तरीत्यैव तल्लाभात् न
न्वेवंनियतवचनानां दारा अप्सरा दारा अप्सरा इत्यादीनामेकशेषो न स्यात् मैवं यावत्प्रत्ययव्यक्तयोयस्यां संभवंति
तदवच्छेदेन सारूप्यस्य विवक्षितत्वात् इति दिक् स्यादेतत् गर्गाइतिन सिध्यति अपत्यबहुत्वेयञोपिबहुत्वे ऽप्रा
पेः प्रत्यर्थं शब्दनिवेशादप्यैकशेषवैयर्थ्यात् नच द्वितीयादीनांयञांप्रकृतेः परत्वत स्यादि तिवाच्यं यञ
न्तेरेकत्वाद्यवधानाभावात् ततश्च गर्गायययइतिस्थितेप्रथमयञः प्रकृतिसंनिपातकृतत्वेन रूपादेकशो

प्र॰
सि॰ सु॰
३१
3/

षेन स्यात् एवं विभक्तिनिमित्तकत्वपक्षेपि समुदायस्य न द्वित्वं तत्त्वार्थं नियतद्विकसंख्यायां एकविभक्त्युत्पत्तौ वोऽयं
सहविवक्षायां विभक्तेस्तासामेकशेष इति पक्षेपि गार्ग्यश्च यश्च इति स्थितेप्येवं नच प्रकृत्यंशं विहाय यश्च
शब्दान्तसात्रूप्यान्तरानुपपत्तिः प्रकृतिविशिष्टसमुदायादेव विभक्त्युत्पत्त्या न तद्घटितसारूप्याश्रये एकशेषविभक्ति
बहिर्भावस्यानुचितत्वात् यत्तु प्रकृत्यर्थानपेक्षसमुदायानभिधायित्वाच्च न चैकैकस्य प्रत्ययार्थस्य प्रकृत्यर्थ
नयोगात्प्रधानार्थस्याच गुणान्वित्तिस्याद्यतया गार्ग्यशब्दानामपि विकृतत्वाद् गार्ग्यशब्दानामेवैकशेष इति वाच्यं तद्धा
नस्य वकृष्ठितिल्यलोपानुपपत्तेः वकृषु वृत्तेर्यञादेरेव तद्विधानात् तस्य च यञ्त्रामेकशेषप्रवेशिष्यमाणाय
ञोवकार्थकत्वाद्युपपत्तेः उक्तरीत्यात् यञंतस्यैव वकार्थकत्वात् मैवं तत्कृते न वकृतत्वे इत्यस्यापि तदंतकृते न वकृत्वे
इत्येवव्याख्यानात् नचैकस्मिन्क्षणे पायेऽपि तिकृतेन तस्मादिवे प्रतिकृतेनाकन् गोविकार्थे वा प
तितस्य लक् प्रतिकृतिवकृत्वविवक्षायां काश्यपा इत्यत्रापि लक् स्यात् यञंतस्यैव वकार्थकत्वादिति वाच्यं अप
त्यवकृत्ववाचिनः एकलोपविधानात् अस्य च प्रतिकृतिवकृत्ववाचित्वात् यद्वा एकस्मादेव गार्ग्यशब्दात् द्वे
षां वकृत्वे ताय त्रेस्तस्यापि प्रकृतिसंनिपातकृत वैरूप्ये सर्वेषां प्रकृत्यर्थविशिष्टप्रत्ययार्थाभिधायित्वाद्धि रूपाणामपि
समानार्थानामित्येकशेष इति सिद्धं । यद्यत द्वंद्वस्तस्यात् नहि प्रत्येकं विभक्त्युत्पत्तौ द्वंद्वः स्यात् सन्निवेनकस्य
वेनाभावान्नतत्प्रसक्तिः एतेन द्वंद्वापवाद एकशेष इति व्याख्यातं ननु पदार्थतावच्छेदकभेदे द्वंद्व इति पक्षे घट
श्च घटश्चेति द्वंद्वस्य न प्रसंग इति चेन्न पदार्थभेदे द्वंद्व इति पक्षसंभवात् पयसी इत्यत्र जलत्वदुग्धत्वरूपपदा
र्थतावच्छेदकभेदसत्त्वाच्च स्यादेतत् एकस्य एकस्य द्वौ च द्वौ चेत्येकशेषः स्यात् अत्र वार्त्तिके संख्यायाश्चार्थास
मत्वाद्द्वन्द्वपदार्थत्वाच्चानेकशेष इति यत्रैकः शब्दोनेकार्थाभिधानसमर्थः तत्रैवैकशेषः प्रयुक्तानामेवानु ३१

त्यानात् एकाविवक्षेच सह्यायादेरेवार्थस्यप्रतीत्याद्वित्वप्रतीत्यभावात् अन्यपदार्थत्वाच्चेत्यस्याः संदिग्धेनपदां
तरेणद्वाविंशत्यादिनैवतदर्थः प्रमाण्यतइत्यर्थः एतेननतत्रद्वंद्वोपिनास्त्यनभिधानात् ननुगार्ग्यौ विंशत्रगार्ग्य
श्रगार्ग्यश्चेति सत्र्वपैकशेषस्यापिसंभवात् संदेहादर्थासंप्रत्ययेपिएकशेषोदर्शने उत्तरकालंप्रकरणादि
नासंदेहनिवृत्तेः नचतत्रद्वंद्वानुत्पत्तेरारंभसामर्थ्यात् तथा अचत्वसंदिग्धविग्रहसंभवान्नेतिवाच्यं अहारेत्यादायप्य घ^
प्रवृत्त्यापत्तेः नैवं अर्थासंप्रत्ययेसत्यन्यपदार्थत्वादितिविशिष्टस्यहेतुत्वात् अत्रेदंतात्पर्यं यत्पदार्थतावच्छेदका
वच्छिन्नेद्वित्वादिपर्याप्त्यधिकरणंतत्पदयोरेकशेषः एकत्वावच्छिन्नेनद्वित्वादिपर्याप्त्यधिकरणं ननुघटत्वा
वच्छिन्नमपिप्रत्येकंनतथा मिलितंत्वेकत्वावच्छिन्नमपितथेतितत्त्वनचतत्रपदार्थतावच्छेदकंघटत्वादिकमप्र
यत्राप्यभिन्नं एकत्वंतत्प्रतिव्यक्तिभिन्नमितिवाच्यं पयसीइत्यादावपिजलत्वरूपत्वरूपपदार्थतावच्छेदकयोःसा
मानाधिकरण्याभावात् नैवं यत्पदार्थतावच्छेदकं प्रकृत्यार्थसंख्यानिष्ठ प्रतियोगितावच्छेदकताकभेदप्र त्य^
कारतानिरूपितविशेष्यतावच्छेदकंनभवतितत्पदयोरेकशेषः एकत्वतत्पकोद्वित्ववच्छिन्नइतिप्रतीतौविशे
ष्यतावच्छेदकमेव एकार्थानामपि पर्याप्तिसंबंधस्यप्रतियोगितावच्छेदकत्वलाभाय प्रत्ययार्थेत्युक्तं एक
घटे घटाविति प्रयोगाभावेनविभक्त्यर्थद्वित्वादेः पर्याप्त्यैवान्वयस्यव्युत्पन्नत्वात् एकोद्वित्ववानित्यत्रतुद्वित्व माश्रयत्व
मात्रेणविशेषणंनतुपर्याप्त्येतिनदोषः घटोद्वित्ववच्छिन्नइत्यत्रापि एकत्वमेव यथोक्तभेदप्रकारतानिरूपि
तविशेष्यतायामवच्छेदकंनतुघटत्वं घटौनद्वाविति प्रयोगाभावात् एवंद्विशाहादावपियोज्यं प्रकृतमनु
सरामः अतएवचैत्रोमैत्रश्चगाढत्तइत्यत्रप्रत्येकमेकत्वान्वयेपि चैत्रत्वमैत्रत्वधर्मितावच्छेदकीकृत्यैवाख्याता
र्थद्वित्वान्वयधीर्नत्वेकत्वमपीत्यदोषः विरूपाणामेकशेषोवक्तव्यः वक्रदंडश्चकुटिलदंडश्चवक्रदंडौकुटिल

प्र॰
सि॰ म॰
३१

दंडौ वा सरूपाणामित्यनेन समानार्थकत्वस्यापि संग्रहात् स्वरभिन्नानां यस्यानस्वरविधिस्तस्यैकशेषो वक्तव्यः स्व
रेणभिन्नानामभिन्नस्वराणामिति यावत् अवदस्याद्वस्थग्रहौ एको व्रशब्दः शोर्दैवनश्यतिसप्रत्ययान्तत्वादंतोदात्तः द्वि
तीयस्तु घञन्तत्वादाद्युदात्त इति तस्यैव शेषः मीमांसकौ एको मीमांसकशब्दो ण्वुलन्तत्वान्मध्योदात्तः अपरस्तु मी
मांसामधीत इति क्रमादिभ्यो वुन्निति आद्युदात्तस्तस्यैकशेषः इदमप्यवधेयं घटाविमावित्यादौ पदार्थतावच्छेदकसामा
नाधिकरण्येन हि द्वित्वं प्रतीयते अन्यथा विमावपि पदार्थतावच्छेदकयोर्विभीतकत्वदेवदत्तत्वयोः परस्परसामाना
धिकरण्याभावेपि प्रत्येकं तदधिकरणयोर्द्वयोर्द्वित्वान्वये द्वित्वेन सहैतयोः समानाधिकरण्यमव्याहतम् पदा
र्थतावच्छेदकयोः परस्परसामानाधिकरण्यप्रत्ययस्यानुभवसिद्धत्वाभावात् अन्वयोजनाभावाच्च घटाविमावित्यादावसंभ
वाच्च एकशेषस्थले च अन्यपदमेव एकपदार्थतावच्छेदकप्रकारकत्वविशिष्टापरपदार्थतावच्छेदकप्रकार
कज्ञानजनकं अनुभवानुरोधात् तथा चानारभ्य एवैकशेषः एकेनैव नानार्थबोधसिद्धेरन्यथा तदारंभेप्य
निस्तारात् न हि स्वतः सतीं शक्तिं राचार्येण कं तु शक्यते शब्दशक्तेर्लौकिकप्रयोगमात्रकल्प्यत्वात् नचैवमपि
विरूपाणामपि द्वित्वादौ ह्यैकशेषापादेरपि वैयर्थ्यापत्तिः प्रत्ययलक्षणादेस्तत्प्रयोजनत्वात् एकशेषस्य प्रक्रियायामु
प्रयोगाविरहात् नचैकेन शब्देन कथमनेकार्थाभिधानमिति वाच्यं नल्पत्वात् वृत्तिविषयतावच्छेदकावच्छिन्न
स्यैवोपस्थितत्वात् एकद्विबहूनामप्यर्थानां घटौ गावौ दारा इत्यादिष्वपि वृत्तिविषयत्वस्याविशेषात् नचैवं सत्यन्यप्राया
वित्यादावपि सह विवक्षायां समुदायार्थप्रादुर्भावादेकेनैवार्थद्वयबोधाद्द्वितीयप्रयोगो न स्यादिति वाच्यं सत्त्वा
विमृकैस्तदानेनैव सहत्वप्रतीतेः क्वचिद्द्विरूपेणाप्यर्थद्वयाभिधानदर्शनाच्च यथा द्यावा क्षामा द्यावा चिदस्मै
पृथिवी नमेते इति द्योशब्देन द्यावापृथिव्योरभिधाने ओकारस्य सुपां सुलुगित्याकारादेशः गोतो णिदित्योकारां ३२

तग्रहणात् गित्वाहुड्डिस्तनच्छावादेशः पृथिवीतिद्विवचनांतं वाछंदसीतिपूर्वसवर्णदीर्घः पृथिवीपदेनदिवस्पृथि
व्योरभिधानं तथाचप्रकरणादिवशाद्यत्रार्थविशेषनिर्णयस्तत्रप्रवृत्तिनिमित्तभेदेपिविरूपस्याप्यनेकार्थाभिधा
यित्वदर्शनात्सरूपस्यतन्नरांतदुपपत्तेः एतेननानार्थानुरोधादेकशेषारंभइत्यप्यपास्तं उक्तरीत्याएकेनैवशा
ब्दनावच्छेदकद्वयप्रकारकधीसंभवात् नचद्वंद्ववर्णार्थमयमारंभः अनभिधानादेवतत्सिद्धेः तदेवंपदद्वये
पिसूत्रेप्रत्याख्याते अतएवसरूपेतिजात्याख्यायामितिचसूत्रयोर्भाष्यकृताप्रत्याख्यानस्यमानत्वेपिलक्ष्यानुरो
धएवपदद्वयाप्रयोगेबीजमितिउक्तंकौस्तुभेप्रपंचस्याशयं एवंचपदार्थतावच्छेदकैकत्वस्यलाभिप्रायेणतु
प्राहवार्तिककारः आकृत्यभिधानादेकंविभक्तौवाजप्यायनइति स्वाभिप्रायवर्णनमात्रार्थंवार्तिकांतर
द्रव्याभिधानंव्याडिरिति जातिव्यक्त्योः पदार्थत्वेतारतम्यंविप्रतिषेधसूत्रेनिरूपयिष्यामः जातिसत्त्वेप्रमाणमाह
सरूपाणांविशेषादिति सरूपाणांबुद्धेरविशेषादेकरूपत्वात् भिन्नव्यक्तिविशेष्यकयोरपिगौरित्याकारकयोर्द्वयोर्धी
योः समानप्रकारकत्वानुभवात् एवंचैकत्वमपिज्ञानेधर्मिग्राहकमानसिद्धं लाघवेननित्यत्वकल्पनाच्चनाश्र
यनाशनाशप्रसंग नचैकस्याज्ञातेर्युगपदनेकव्यक्तिषुकथंवृत्तिरितिवाच्यं तस्याअपिधर्मिग्राहकात्सिद्धेः यत्तु
एकंद्रव्यमनेकस्मिन् कृत्स्नशोनं आहतोयुगपत्सर्वत्रभवतीतिभाष्यं तदभ्युच्चयमात्रं कार्यत्वेहेतुतदुपपत्तेरुक्तत्वरमी
मांसायांनिरूपितत्वात् अचेतनदेवतापदेनसंनिधानस्यैवानंगीकारात् ननुगोत्वव्यापकमेवएकंवाच्यं अन्यथा
उत्पन्नेगोपिंडेतत्संबंधोनस्यात् तदुक्तंवार्तिके नयातिनचतत्रासीदस्तिपश्चान्नचांशवत् जहातिपूर्वंनाधारमहोव्य
सनसंततिः ननुघटादावपिगोत्वप्रकारकप्रत्ययप्रसंगः तदुक्तंव्य[illegible]वेकत्रसत्वव्यक्तिभेदात्सर्वगताप्यादिजा
तिरूपेणसर्वत्रेतिमैवं समवायाख्यसंबंधविशेषस्यगोव्यक्तिभिरेवस्वीकारात् नचचस्वभावस्यैवनिया

२०

श्री०

प्र॰
सि॰त॰
२२

33

मकत्वात् अत एव जीवानां व्यापकत्वेप्यवच्छेदकतया व्यः संबंधः शरीरविशेष एव स्वीक्रियते अन्यथा सर्वश
रीरावच्छेदेन सर्वेषां सुखादिसाक्षात्कारापत्तेः यत्तु बौद्धैः अपोह एव अतद्व्यावृत्तिरूपो जातिः गोभिन्नभेदरूपो गोमा
त्रे सत्वा ~~त्साक्षात्कारापत्तेः यत्तु बौद्धैः अपोह एव अतद्व्यावृत्तिरूपो जातिः गोभिन्नभेदश्च यत्किंचिद्भेदो वा प्रतियोगि~~
~~नात्~~ इति रिक्तगोत्वमानाभावादिति तदसत् गोभिन्नभिन्नत्वं यत्किंचिद्भेदप्रतियोगिकाभेदो निवेश्यते गोत्वाव
च्छिन्नप्रतियोगिताको वा नाद्यः गोरपि यत्किंचिद्भेदवत्त्वाभिन्नत्वात् तद्भेदस्य घटेपि सत्वात् तत्रापि गोरिति प्रत्य
यापत्तेः नान्त्यः अतिरिक्तगोत्वसिद्धेः तदाहुः सिद्धश्चा गौरपोह्येत गोनिषेधात्मकश्च सः तत्र गौरेव वक्तव्यो नञा
यः प्रतिषिध्यते इति क्रियाशब्दानामपि जातिवाचित्वमेव गुरुतं तुल्यादिपाकव्यक्तिष्ववान्तरवैलक्षण्यस्य सत्वेपि
पाकत्वस्य प्रत्यभिज्ञाबलात्सिद्धेः भिन्नडित्थशब्दगतडवित्थाडित्थशब्दत्वेनाभेदेषु भिन्नप्रत्ययाधिकारे हेतुः तथा
हेत्वायमिति शब्दार्थयोरभेदाध्यवसायादर्थस्य डित्थशब्देषु संज्ञिष्वपि संबंधिसंबंधात् भिन्नप्रत्ययाभिधानानि
मित्तं तथा च स्वाश्रयवाच्यत्वसंबंधेन व्यक्तिनिष्ठडित्थशब्दत्वं तदर्थेषु प्रवृत्तिनिमित्तं वह्निमानित्यादौ स्वस
मवायिसंयोगसंबंधेन वह्नित्वमित्याशयः नैऋत्यादौ स्वपरोत्तत्वप्रत्यक्षत्वादिकं अभावाश्रितारूपत्व
त्रापि निरूपाख्यत्वं नाम सामान्यमाश्रयणीयं गोत्वाश्वत्वे सामान्ये इति व्याहृतेष्वनुवृत्तप्रत्ययहेतुत्वं सामान्या
नामपि सामान्यमस्ति अथवा तिः सामान्यानि सामान्यानीति तार्किकदर्शने वैयाकरणे ते नियमतत्रास्थेयं का
यौयौयमानाहि तेषां पदार्था इति सामान्येष्वपि सामान्यमस्ति इति केयटः नचैवं सामान्येष्वपि सामान्यस्वीका
रेनवस्थापत्तिरिति वाच्यं । एकव्यक्तिकत्वमस्येवेति तत्र तत्साधारणजात्यन्तरस्वीकारे प्रयोजनाभावात् सामान्य
त्वजात्यैव तत्रानुवृत्तप्रतीत्युपपत्तेरिति दिक् ननु जातेः पदार्थत्वे द्वित्वादीनां कथमन्वयः तस्यापकत्वात्तमेव एका

५०

ग्र्यसंबंधविवक्षायामाकृतेरेकवचनं यथा पशुना यजेतेति अनेकाश्रयसंबंधविवक्षायां तु द्विवचनबहुवचने न
हि जातिपदार्थवादिनामक्रेरनभिधेयत्वं स्त्रीक्रियते किंतु गुणभावमात्रं तत्र यथा पचति पचतः पचंतीत्यादौ क्रि
यायाधारभेदेपि साधनसंख्याकृतो वचनभेद एवमाकृतिपक्षेपि द्रव्यसंख्याकृत इत्यदोषात् नन्वेवमपि लिंगभ
देन स्यात् ब्राह्मणी ब्राह्मण इति उक्तं हि विशेषणानां चाजातेरित्यत्र आदिष्टलिंगा जातिरिति सर्वदा एकमेवा
श्रयगतं लिंगमुपादत्ते मैवं स्तनकेशादिसंबंधरूपस्त्रीत्वादेर्लौकिकस्यात्र लिंगत्वेनानुपादानात् तथा सति
लिंगांतरसंबंधायोगात् किंतु स्वसिद्धांतव्यवस्थाशास्त्रीकैराश्रीयते तथा हि सत्वरजस्तमसः परिणामरूपा
णां शब्दादीनां वृद्धिरूपासमवस्था वस्थाः शास्त्रैकगोचरा लिंगत्वेन परिगृह्यंते गुणानां वृद्धिः पुंस्त्वं अपचयः
स्त्रीत्वं स्थितिमात्रं नपुंसकत्वं अत एवोत्कर्षापकर्षसे॰ पितद्विवक्षया स्थितिमात्राभिप्रायेण सामान्ये नपुंस
कमिति शास्त्रसंग्रहेन एतच्च स्त्रियामिति सूत्रे प्रपंचयिष्यामः ॥ ॥ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥
अपत्यमंतर्हितं वृद्धमिति पूर्वाचार्यपरिभाषया वृद्धपदं गोत्रपरं पारिभाषिकयुवपदसाहचर्यात् युवप
त्ययांतेन सहोक्तौ गोत्रप्रत्ययांतः शिष्यते उक्तं च प्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं गार्ग्यश्च गार्ग्यायण
श्च गार्ग्यौ वृद्ध इति किं गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ यूनेति किं गर्गश्च गार्ग्यश्च गर्गगार्ग्यौ तल्लक्ष
णेति किं गार्ग्यश्च वात्स्यायनश्च गार्ग्यवात्स्यायनौ कृत्स्नेति किं भागवित्तिभागवित्तिकौ भागवित्तिशब्दाद्गो
त्रापत्ये युवत्वे तस्माद्युवापत्ये वृद्धाट्ठक् सौवीरेषु बहुलमिति ठक् इह न केवलं प्रत्ययमात्रकृतं वैरूप्य
किंतु कुत्सा सौवीरगोत्रत्वकृतमपि गोत्रात् स्त्रियाः कुत्सन इत्यतः कुत्सने स्याद्वृद्धेः ॥ ॥ स्त्री पुंवच्च ॥
यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत् स्त्रीत्वप्रयुक्तवैरूप्याधिकादस्याभावारंभः गार्गी च गार्ग्या

प्र· यौगोत्रगर्गाः। अस्त्रियामित्यनुवृत्तौ यञञोश्चेति लुक्। दाक्षीवदाक्षायणश्च दाक्षी इत्यत्र स्त्रीशब्दस्य स्वरितत्वेनतद
सि·स· धिकारीयप्रत्ययोपादाने पुंवत्त्वं प्रत्ययस्त्यभावातिदेशो वा स्वरितत्वाभावे शब्दग्रहणं वा अर्थग्रहणं वाना
२४ यः। उभयत्र लोके गार्ग्याः स्वरात्परत्रयत्रश्रवणापत्तेः। अस्त्रियामितितल्लोपनिषेधात्। प्रथमपक्षप्रतिषेधे चायं दोषः यद्वृद्धा
येतस्मीसहशार्थत्वात् शिष्यमाणस्य लुप्यमानार्थाभिधायित्वात् नहि तृतीयः स्त्रीत्वस्यानिहत्या गार्ग्याय
श्वपत्वत्र तस्माद्धसेनः पुंसीतिनत्वानुपपत्तेः तस्मात्तृतीयः साधु पुमर्थातिदेशात स्त्रीपुंस्कार्यप्रवृत्तेः पु
म^ वत्त्वञ्चापि वैवाच्यं॥ पुमान्स्त्रिया॥ सरूपाणां मध्ये स्त्रिया सह पुमान् शिष्यते सच पूर्ववदेव तल्लक्षणश्चेद्विशे
षः। हंसश्च हंसी च हंसौ। शिष्यमाणस्य लुप्यमानार्थाभिधायित्वेन स्त्रीत्वस्यापि सत्वेन टाप्प्रसङ्गः। पूर्ववदेवमनु
वृत्तेर्न भवति यदा तरंगमेवापि तल्लक्षणविशेषः यमेकशेषः यथा गौश्चायं गोश्चेयमित्यत्र गावौ चरतः इतिक ^स्यानान्वर्थेन स
याटः। तद्भिन्नकृतविशेषविरहरूपे विशिष्टाभावेप्येकशेषः शिष्टप्रयोगस्य नियामकत्वाच्च नातिप्रसंगः इ चात्रापि विशेषा
तिन्यासकारः। हंसत्वजातेः शक्यतावच्छेदकत्वसाम्यादुद्भेदस्य स्त्रीत्वमात्रलक्षणत्वेऽपि हंसश्च वरटा चेत्या भावात्स्यैवेति दी
दौ नैकशेषः सरूपानुवृत्त्या प्रकृतिसाम्यलाभात्॥ भ्रातृपुत्रौ स्वसृदुहितृभ्यां॥ भ्राता च स्वसा च भ्रातरौ क्षिताः पुमानिति
पुत्रश्च दुहिता च पुत्रौ पूर्वसूत्रे सरूपपदानुवृत्तौ चेत्तदेवसूत्रमात्रं अन्यथाऽन्यापितेनैवस्यात् तदादीनाम योगविभागाद्विशे
वैरिव्यत्र तन्नतदनुवृत्तिर्विवक्षितत्वात्। अत्र भाष्ये गार्ग्यश्च गार्ग्यायणश्चेत्यत्र वृद्धयूनोर्यदेकं गर्गापत्यत्वरू षाभावेप्येकशेषः^
पसामान्यं तस्यैव विवक्षितत्वात् इं गार्ग्याविति वृद्धयूनोरन्योपादाने किंवा वृद्धयोरेवेति विशेषावधारणा
र्थमेकशेषारंभपक्षेऽपि प्रकरणादेरपेक्षणीयत्वात् सामान्योपादानेऽपि तेनैव विशेषनिर्णयसंभवात् नच
वृद्धवारणार्थमेकशेषारंभः अनभिधानादेव तन्निवृत्तेः स्त्रीपुंसयोरपि मृगक्षीरादिवज्जातिमात्रविवक्षायां ३८

ब्राह्मणवित्सादिसिद्धम्। स्यादेतत् ब्राह्मणवत्साच ब्राह्मणीवत्सश्चेत्यत्र पुमान् स्त्रियेत्येकशेषप्रसंगः यद्यै
काप्रत्ययप्रकृतिरन्यत्रैवेत्युक्तं तादृशविषयस्यासत्वात् नचैकविभक्तावित्यनुवृत्त्या एकशेषनिमित्तेविभ
क्तौ परतो यत्र स्त्रीपुंसकृतो विशेषस्तत्रैकशेषः इह तु पूर्वं पदविभक्तावपि स्त्रीपुंसकृतविशेषसत्वान्नेति
वाच्यं कारकस्य कारिका च कारकावित्येकशेषानापत्तेः इहत्वत्र स्त्रीत्वकृतो विशेषस्तस्य चैकशेषनिमि
त्तविभक्तिमपेक्ष्य पूर्वत्वाभावात् नच [illegible]तस्य स्त्रीप्रत्ययकृतविशेषरूपत्वेपि स्त्रीत्वरूपार्थकृतविशेषत्वं ना
स्तीति वाच्यं तथा सति गोमांश्च गोमती च गोमन्तावित्यसिद्धेः स्त्रीप्रत्ययेनात्र विशेषान्तरानाधानात् स्त्रीत्व
रूपार्थेनतु प्रत्ययरूपस्यैव विशेषस्या त्वात् तथा च क्वचिद्दृष्टाहितस्य क्वचिच्च स्त्रीप्रत्ययाहितस्य वि
शेषस्यावश्यग्राह्यत्वात् नच पदद्वयेपि पटुश्च पट्वी च पटू इत्यादेरेकशेषो न स्यात् यणादेशे स्त्रीत्वस्त्रीप्र
पि॰ त्ययान्यतरस्यानिमित्तत्वाभावात् अन्तरङ्गत्वमेवाश्रित्य यणो विहितत्वादिति वाच्यं तद्भावभावितामात्रेण
स्त्रीप्रत्ययस्य परंपरया च स्त्रीत्वस्य यणादेशे निमित्तत्वात् एवं रत्वपीति ब्राह्मणवत्सा चेत्यादावेकशेषोदुर्वार
इति चैवं तत्पदस्यानुवृत्त्या प्रधानयोरेव स्त्रीपुंसयोर्ग्रहणात् सहविवक्षायां चैकशेषविधानात् तस्याश्च
प्रधानमात्रविषयकत्वात् यत्र प्रधानस्त्रीपुंसकृतो विशेषस्तत्रैकशेषः अत्र त्वप्रधानस्त्रीपुंसकृतस्यापि वि
शेषस्यासत्वादिति ॥ ॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥ अक्लीबेन सहोक्तौ क्लीबं शिष्यते नैकवद्वा
तल्लक्षणश्चेह शेषः शुक्लश्च कंबलः शुक्लं च वस्त्रं तदिदं शुक्लं तेइमे शुक्ले शुक्लः कंबलः शुक्ला बृहती
का शुक्लं वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि अत्र भाष्ये स्थितिमात्रविवक्षायां औत्सर्गिकं नपुंसकमेव
सिद्धं नचपादिकैकवद्भावार्थं सूत्रं जातिप्राधान्यविवक्षयैव सिद्धेः ॥ ॥ पिता मात्रा ॥ स्यादेचेत्यनुवर्तते पि

प्र·
सि·सु·
३५

ताचमाताचपितरौ· मातापितरौ द्वंद्वेऽभावेऽपि पितरौधनभाजाविमेनत् व्याख्याने यद्यपि युगपदधिकरण
वचनतायां द्वंद्वस्मरणात्तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते तथापि विग्रहवाक्ये मा
तृशब्दस्य पूर्वनिपातादेकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्वश्रवणात्तत्क्रमेणार्थक्रमा
वगमाद्धनसंबंधेऽपि क्रमापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माता धनभाक् तदभावे पितेति गम्यते इति वि
ज्ञानेश्वरः एतेन जगतः पितरौ वंदे पार्वतीपरमेश्वराविति पितृव्याख्यानं योग्यतादिप्रमाणांतरवशान्निर्णेय,
इति पर्यवसानात् एतेन भवानपि तत्त्वहृष्ट्या विशेषसायुज्यमासादितेशिवाभ्यामिति विषयांतरमपि व्याख्यातं ५८
स्त्रीलिंगस्य विग्रहवाक्ये पूर्वप्रयोगनियमे मानाभावात् उष्ट्रीचकरभश्च हस्तश्च वरदाचेत्यादौ कस्मात्तु भव
तीति भाष्यदर्शनात् ॥ ॥ श्वशुरः श्वश्र्वा ॥ स्पष्टं श्वश्रूश्च श्वशुरश्च श्वशुरौ स्त्रूत्रद्वयमपि हृत्त्वा भाष्ये हति विषये प्रात्रा
दिशब्दानां स्वस्रादिबोधकत्वं तावदेकशेषारंभेऽपि स्वीकार्यं शिष्यमाणेन लुप्यमानार्थाभिधायीति सिद्धांता
त् तद्वदेकशेषं विनापि शब्दार्थसंबंधस्य नित्यत्वात्सहविवक्षायामेव तथात्वं स्वीक्रियतां अनभिधानाच्च
भ्रातृस्वसृशब्दयोर्न द्वंद्वः मातापितरौ श्वश्रूश्वशुराविति त्व च द्वंद्वस्य वा शब्दानुशासनात् यापि स्वीकारात् कि
मर्थं सरूपयोरेकशेष उत विरूपयोरिति व्यवधारणार्थं प्रकरणादेर्नियामकत्वस्य वाच्यत्वाच्चेति स्यालः स्वसो
रयोग्रहीदिति भागवतेन तस्य स्वसृपदं प्राणभृत उपदर्शितमिति वत् लिंगसमवायेन स्वस्तनस्यालोलाद्दिणां क न
चोभयोः साम्यादल्पत्वानुपपत्तिः तत्प्रमाणपदगर्भमंत्रस्य तद्दर्शितमेवापेक्षया अल्पत्वादिति वाच्यं लक्षणापेक्ष
याशब्दानां बहुत्वाभावमात्रस्य तत्रविवक्षितत्वादिति श्रीधरः ॥ ॥ त्यदादीनि सर्वैर्नित्यं ॥ सभित्रैः सर्वैः स
होक्तौ त्यदादीनि निशिष्यंते स च देवदत्तश्च तौ त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानीति वक्ष्यमाणं साचदे

३५

वटनस्थानौ साचकुंडेरचतानि शिष्यमाणत्वात्यदादिलिंगेप्राप्तेऽयमारंभः पुंनपुंसकयोस्त्वेकशेषेशब्दपरविप्रतिषेधा
न्नपुंसकशेषः नचदेवदत्तस्थाने अयंदृष्टनस्त्रुरूपविशेषणानामिति वक्तव्यं सचकुक्कुटः साचमयूरीचकुक्कुटमयू
र्यौते तच्चसाचग्रईविपल्लाने न्याय सिद्धंचेदं परवल्लिंगंद्वंद्वतत्पुरुषयोरितिसमासार्थस्यलिंगातिदेशात्त
द्विशेषणस्यसर्वनाम्नस्तल्लिंगत्वसिद्धेरितिकेचित् यदः त्यदादीनांसर्वनाम्नां यावत्तुमात्रपरामर्षकत्वात्यदादिनरेणास
होक्तौतेषामेवशेषोन्यायसिद्धइतिनेदमारभ्यं नचत्यदादीनांपरस्परेणच्छिन्नत इत्यनर्थ्यंसूत्रं। नहिनाशब्दपर
विप्रतिषेधात्लाभादितिवाच्यं सचयस्त्वतावानयथावान्येतिपूर्वशेषस्यापीष्टत्वात् सूत्रारंभपक्षेवचनादसिद्धेः
नापिस्यहेवदत्ताविति प्रयोगवारणार्थं सामान्यविशेषवाचिनोर्नद्वंद्वइतिवचनस्यावश्यकत्वात् नचैवंस्य
द्राभीरंगोवलीवर्दस्तत्रोत्पन्नइतिनस्यादितिवाच्यं आभीराणांजात्यंतरत्वात् ब्राह्मणादुग्रकन्यायामाभीरोनाम
जायते माहिष्योग्रेप्रजायेतेविट्शूद्रांगनयोर्नृपादितिस्मृतेः गोशब्दस्यस्त्रीगवीमात्रवाचकत्वात् वृषभश
ब्देनतरस्वीकारात् नचसामान्यपदेनविशेषार्थस्यापिप्रतीतिसिद्धेर्नद्वंद्वप्रसक्तिरितिवाच्यं नब्राह्मणमान
यगार्ग्यमितिप्रयोगदर्शनात् विशेषणविशेष्यभाववत् विशेषसंनिधौसामान्यशब्दस्यतदितरविशेषप
रत्वस्यापिब्राह्मणागतागतावसिष्ठोऽप्यागतइत्यादौदर्शनात् तस्मात्सामान्यविशेषयोर्द्वंद्वनिषेधवचनस्यावश्य
कत्वात्तन्नपवसिद्धौनैतत्सूत्रमारभ्यमितिभाष्यं ॥ ग्राम्यपशुसंघेष्वतरुणेषुस्त्रीपुमान्स्त्रियेत्यस्यापवादः प
शुसहविवक्षायांस्त्रीशिष्यते गाव इमाः अजा इमाः ग्राम्येतिकिं रुरुकवइमे सूकरा इमे पश्विति किं ब्राह्मण
इमे संघेतिकिं एतौगावौ संघेत्वनुपपन्नानद्वरटक द्व्यवयवसंघसंभवेऽपिसंघपदग्रहसामर्थ्या
दनेकवृत्तिसंघस्यविवक्षितत्वात् अतरुणेतिकिं तरुणाकाइमे वर्कराइमे संघेनतरुणत्वनदभावः

प्र. योरन्वयानुपयोगात्संबद्धटकपञ्चव्यक्तिः निरुपयोरन्वयोरुपादानं सामर्थ्यात् अनेकशाकेष्विति वाच्ये नेह
सि.स्तु अस्थ्याश्मे उष्ट्राश्मे विकल्पानुवृत्त्याव्यवस्थितत्वाच्चेटमिति न्यासकृत् अत्रापि भाष्ये नैतदारभ्यं संवेशग्नी
३९ गवीनामेव वाकृत्यात् मल्लग्रामादिवद्रूमत्त्वेन व्यपदेशादेव स्त्रीशेषसिद्धेः अग्रामेष्वनंतर्गुसामेव प्रा
धान्यात् उष्ट्राणां तारण्यकत्वेन सत्त्वारंभेपि स्त्रीशेषत्वाभावात् ब्राह्मणाश्वालादावपि तुसामेव प्राथा
न्यात् पत्तावित्यादौ च निर्दिष्टे लिंगविशेषे पुमपवशेषात् वत्साश्मेत्यादावपि पुंसामेव प्राधान्यादि
ति ॥ इति श्रीसिद्धांतसस्थानि योप्रथमस्याह्निनीयस्तीयमाह्निके पादश्चायसमाप्तः ॥ ॥